# Viveka Chudamani



**Adi Shankaracharya**

## Testo in Sanscrito

**www.aghori.it**

# विवेकचूडामाणि

सर्ववेदान्तसिद्धान्तगोचरं तमगोचरम् ।

गोविन्दं परमानन्दं सद्गुरुं प्रणतोऽस्म्यहम् ॥ १ ॥

*sarvavedāntasiddhāntagocaraṁ tamagocaram |*
*govindaṁ paramānandaṁ sadguruṁ praṇato'smyaham ||* ***1****||*

जन्तूनां नरजन्म दुर्लभमतः पुंस्त्वं ततो विप्रता

तस्माद्वैदिकधर्ममार्गपरता विद्वत्त्वमस्मात्परम् ।

आत्मानात्मविवेचनं स्वनुभवो ब्रह्मात्मना संस्थितिः

मुक्तिर्नो शतजन्मकोटिसुकृतैः पुण्यैर्विना लभ्यते ॥ २ ॥

*jantūnāṁ narajanma durlabhamataḥ puṁstvaṁ tato vipratā*
*tasmādvaidikadharmamārgaparatā vidvattvamasmātparam |*
*ātmānātmavivecanaṁ svanubhavo brahmātmanā saṁsthitiḥ*
*muktirno śatajanmakoṭisukṛtaiḥ puṇyairvinā labhyate ||* ***2****||*

दुर्लभं त्रयमेवैतद्देवानुग्रहहेतुकम् ।

मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः ॥ ३ ॥

*durlabhaṁ trayamevaitaddevānugrahahetukam |*
*manuṣyatvaṁ mumukṣutvaṁ mahāpuruṣasaṁśrayaḥ ||* ***3****||*

लब्ध्वा कथचिन्नरजन्म दुर्लभं

तत्रापि पुंस्त्वं श्रुतिपारदर्शनम्।

यस्त्वात्ममुक्तौ न यतेत मूढधीः

स ह्यात्महा स्वं विनिहन्त्यसद्ग्रहात्॥ ४॥

*labdhvā kathacinnarajanma durlabhaṁ*
*tatrāpi puṁstvaṁ śrutipāradarśanam |*
*yastvātmamuktau na yateta mūḍhadhīḥ*
*sa hyātmahā svaṁ vinihantyasadgrahāt || **4**||*

इतः को न्वस्ति मूढात्मा यस्तु स्वार्थे प्रमाद्यति।

दुर्लभं मानुषं देहं प्राप्य तत्रापि पौरुषम्॥ ५॥

*itaḥ ko nvasti mūḍhātmā yastu svārthe pramādyati |*
*durlabhaṁ mānuṣaṁ dehaṁ prāpya tatrāpi pauruṣam || **5**||*

वदन्तु शास्त्राणि यजन्तु देवान्

कुर्वन्तु कर्माणि भजन्तु देवताः।

आत्मैक्यबोधेन विनापि मुक्तिः

न सिध्यति ब्रह्मशतान्तरेऽपि॥ ६॥

*vadantu śāstrāṇi yajantu devān*
*kurvantu karmāṇi bhajantu devatāḥ |*
*ātmaikyabodhena vināpi muktiḥ*
*na sidhyati brahmaśatāntare'pi || **6**||*

अमृतत्वस्य नाशास्ति वित्तेनेत्येव हि श्रुतिः ।
ब्रवीति कर्मणो मुक्तेरहेतुत्वं स्फुटं यतः ॥ ७ ॥

*amṛtatvasya nāśāsti vittenetyeva hi śrutiḥ /*
*bravīti karmaṇo mukterahetutvaṁ sphuṭaṁ yataḥ // 7//*

अतो विमुक्त्यै प्रयतेत विद्वान्
संन्यस्तबाह्यार्थसुखस्पृहः सन् ।
सन्तं महान्तं समुपेत्य देशिकं
तेनोपदिष्टार्थसमाहितात्मा ॥ ८ ॥

*ato vimuktyai prayateta vidvān*
*sannyastabāhyārthasukhaspṛhaḥ san /*
*santaṁ mahāntaṁ samupetya deśikaṁ*
*tenopadiṣṭārthasamāhitātmā // 8//*

उद्धरेदात्मनात्मानं मग्नं संसारवारिधौ ।
योगारूढत्वमासाद्य सम्यग्दर्शननिष्ठया ॥ ९ ॥

*uddharedātmanātmānaṁ magnaṁ saṁsāravāridhau /*
*yogārūḍhatvamāsādya samyagdarśananiṣṭhayā // 9//*

संन्यस्य सर्वकर्माणि भवबन्धविमुक्तये ।
यत्यतां पण्डितैर्धीरैरात्माभ्यास उपस्थितैः ॥ १० ॥

*sannyasya sarvakarmāṇi bhavabandhavimuktaye /*
*yatyatāṁ paṇḍitairdhīrairātmābhyāsa upasthitaiḥ // **10**//*

चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये ।
वस्तुसिद्धिर्विचारेण न किंचित्कर्मकोटिभिः ॥ ११ ॥

*cittasya śuddhaye karma na tu vastūpalabdhaye /*
*vastusiddhirvicāreṇa na kiñcitkarmakoṭibhiḥ // **11**//*

सम्यग्विचारतः सिद्धा रज्जुतत्त्वावधारणा ।
भ्रान्तोदितमहासर्पभयदुःखविनाशिनी ॥ १२ ॥

*samyagvicārataḥ siddhā rajjutattvāvadhāraṇā /*
*bhrāntoditamahāsarpabhayaduḥkhavināśinī // **12**//*

अर्थस्य निश्चयो दृष्टो विचारेण हितोक्तितः ।
न स्नानेन न दानेन प्राणायमशतेन वा ॥ १३ ॥

*arthasya niścayo dṛṣṭo vicāreṇa hitoktitaḥ /*
*na snānena na dānena prāṇāyamaśatena vā // **13**//*

अधिकारिणमाशास्ते फलसिद्धिर्विशेषतः ।
उपाया देशकालाद्याः सन्त्यस्मिन्सहकारिणः ॥ १४ ॥

*adhikāriṇamāśāste phalasiddhirviśeṣataḥ /*
*upāyā deśakālādyāḥ santyasminsahakāriṇaḥ // **14**//*

अतो विचारः कर्तव्यो जिज्ञासोरात्मवस्तुनः ॥
समासाद्य दयासिन्धुं गुरुं ब्रह्मविदुत्तमम् ॥ १५ ॥

*ato vicāraḥ kartavyo jijñāsorātmavastunaḥ //*
*samāsādya dayāsindhuṁ guruṁ brahmaviduttamam //* ***15***//

मेधावी पुरुषो विद्वानूहापोहविचक्षणः ।
अधिकार्यात्मविद्यायामुक्तलक्षणलक्षितः ॥ १६ ॥

*medhāvī puruṣo vidvānūhāpohavicakṣaṇaḥ /*
*adhikāryātmavidyāyāmuktalakṣaṇalakṣitaḥ //* ***16***//

विवेकिनो विरक्तस्य शमादिगुणशालिनः ।
मुमुक्षोरेव हि ब्रह्मजिज्ञासायोग्यता मता ॥ १७ ॥

*vivekino viraktasya śamādiguṇaśālinaḥ /*
*mumukṣoreva hi brahmajijñāsāyogyatā matā //* ***17***//

साधनान्यत्र चत्वारि कथितानि मनीषिभिः ।
येषु सत्स्वेव सन्निष्ठा यदभावे न सिध्यति ॥ १८ ॥

*sādhanānyatra catvāri kathitāni manīṣibhiḥ /*
*yeṣu satsveva sanniṣṭhā yadabhāve na sidhyati //* ***18***//

आदौ नित्यानित्यवस्तुविवेकः परिगण्यते ।
इहामुत्रफलभोगविरागस्तदनन्तरम् ।
शमादिषट्कसम्पत्तिर्मुमुक्षुत्वमिति स्फुटम् ॥ १९ ॥

*ādau nityānityavastuvivekaḥ parigaṇyate /*

*ihāmutraphalabhogavirāgastadanantaram |*
*śamādiṣaṭkasampattirmumukṣutvamiti sphuṭam || **19**||*

ब्रह्म सत्यं जगन्मिथ्येत्येवंरूपो विनिश्चयः।
सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः॥ २०॥
*brahma satyaṁ jaganmithyetyevaṁrūpo viniścayaḥ |*
*so'yaṁ nityānityavastuvivekaḥ samudāhṛtaḥ || **20**||*

तद्वैराग्यं जिहासा या दर्शनश्रवणादिभिः।
देहादिब्रह्मपर्यन्ते ह्यनित्ये भोगवस्तुनि॥ २१॥
*tadvairāgyaṁ jihāsā yā darśanaśravaṇādibhiḥ |*
*dehādibrahmaparyante hyanitye bhogavastuni || **21**||*

विरज्य विषयव्राताद्दोषदृष्ट्या मुहुर्मुहुः।
स्वलक्ष्ये नियतावस्था मनसः शम उच्यते॥ २२॥
*virajya viṣayavrātāddoṣadṛṣṭyā muhurmuhuḥ |*
*svalakṣye niyatāvasthā manasaḥ śama ucyate || **22**||*

विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके।
उभयेषामिन्द्रियाणां स दमः परिकीर्तितः।
बाह्यानालम्बनं वृत्तेरेषोपरतिरुत्तमा॥ २३॥
*viṣayebhyaḥ parāvartya sthāpanaṁ svasvagolake |*
*ubhayeṣāmindriyāṇāṁ sa damaḥ parikīrtitaḥ |*
*bāhyānālambanaṁ vṛttereṣoparatiruttamā || **23**||*

सहनं सर्वदुःखानामप्रतीकारपूर्वकम् ।

चिन्ताविलापरहितं सा तितिक्षा निगद्यते ॥ २४ ॥

*sahanaṁ sarvaduḥkhānāmapratīkārapūrvakam |*

*cintāvilāparahitaṁ sā titikṣā nigadyate || **24**||*

शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्यवधारणम् ।

सा श्रद्धा कथिता सद्भिर्यया वस्तूपलभ्यते ॥ २५ ॥

*śāstrasya guruvākyasya satyabuddhyavadhāraṇam |*

*sā śraddhā kathitā sadbhiryayā vastūpalabhyate || **25**||*

सर्वदा स्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्वदा ।

तत्समाधानमित्युक्तं न तु चित्तस्य लालनम् ॥ २६ ॥

*sarvadā sthāpanaṁ buddheḥ śuddhe brahmaṇi sarvadā |*

*tatsamādhānamityuktaṁ na tu cittasya lālanam || **26**||*

अहंकारादिदेहान्तान् बन्धानज्ञानकल्पितान् ।

स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षुता ॥ २७ ॥

*ahaṅkārādidehāntān bandhānajñānakalpitān |*

*svasvarūpāvabodhena moktumicchā mumukṣutā || **27**||*

मन्दमध्यमरूपापि वैराग्येण शमादिना ।

प्रसादेन गुरोः सेयं प्रवृद्धा सूयते फलम् ॥ २८ ॥

*mandamadhyamarūpāpi vairāgyeṇa śamādinā |*
*prasādena guroḥ seyaṁ pravṛddhā sūyate phalam || **28**||*

वैराग्यं च मुमुक्षुत्वं तीव्रं यस्य तु विद्यते ।
तस्मिन्नेवार्थवन्तः स्युः फलवन्तः शमादयः ॥ २९ ॥

*vairāgyaṁ ca mumukṣutvaṁ tīvraṁ yasya tu vidyate |*
*tasminnevārthavantaḥ syuḥ phalavantaḥ śamādayaḥ || **29**||*

एतयोर्मन्दता यत्र विरक्तत्वमुमुक्षयोः ।
मरौ सलीलवत्तत्र शमादेर्भानमात्रता ॥ ३० ॥

*etayormandatā yatra viraktatvamumukṣayoḥ |*
*marau salīlavattatra śamāderbhānamātratā || **30**||*

मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी ।
स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते ॥ ३१ ॥

*mokṣakāraṇasāmagryāṁ bhaktireva garīyasī |*
*svasvarūpānusandhānaṁ bhaktirityabhidhīyate || **31**||*

स्वात्मतत्त्वानुसन्धानं भक्तिरित्यपरे जगुः ।
उक्तसाधनसंपन्नस्तत्त्वजिज्ञासुरात्मनः ।
उपसीदेद्गुरुं प्राज्ञं यस्माद्बन्धविमोक्षणम् ॥ ३२ ॥

*svātmatattvānusandhānaṁ bhaktirityapare jaguḥ |*
*uktasādhanasampannastattvajijñāsurātmanaḥ |*
*upasīdedguruṁ prājñaṁ yasmādbandhavimokṣaṇam || **32**||*

श्रोत्रियोऽवृजिनोऽकामहतो यो ब्रह्मवित्तमः।

ब्रह्मण्युपरतः शान्तो निरिन्धन इवानलः।

अहेतुकदयासिन्धुर्बन्धुरानमतां सताम्॥ ३३॥

*śrotriyo'vṛjino'kāmahato yo brahmavittamaḥ |*
*brahmaṇyuparataḥ śānto nirindhana ivānalaḥ |*
*ahetukadayāsindhurbandhurānamatāṁ satām || **33**||*

तमाराध्य गुरुं भक्त्या प्रह्वप्रश्रयसेवनैः।

प्रसन्नं तमनुप्राप्य पृच्छेज्ज्ञातव्यमात्मनः॥ ३४॥

*tamārādhya guruṁ bhaktyā prahvapraśrayasevanaiḥ |*
*prasannaṁ tamanuprāpya pṛcchejjñātavyamātmanaḥ || **34**||*

कारुण्यसिन्धो पतितं भवाब्धौ।

मामुद्धरात्मीयकटाक्षदृष्ट्या

ऋज्व्यातिकारुण्यसुधाभिवृष्ट्या॥ ३५॥

*svāminnamaste natalokabandho*
*kāruṇyasindho patitaṁ bhavābdhau |*
*māmuddharātmīyakaṭākṣadṛṣṭyā*
*ṛjvyātikāruṇyasudhābhivṛṣṭyā || **35**||*

दोधूयमानं दुरदृष्टवातैः।

भीतं प्रपन्नं परिपाहि मृत्योः

शरण्यमन्यद्यदहं न जाने ॥ ३६ ॥

*durvārasaṁsāradavāgnitaptaṁ*
*dodhūyamānaṁ duradṛṣṭavātaiḥ /*
*bhītaṁ prapannaṁ paripāhi mṛtyoḥ*
*śaraṇyamanyadyadahaṁ na jāne // 36//*

शान्ता महान्तो निवसन्ति सन्तो
वसन्तवल्लोकहितं चरन्तः ।
तीर्णाः स्वयं भीमभवार्णवं जना-
नहेतुनान्यानपि तारयन्तः ॥ ३७ ॥

*śāntā mahānto nivasanti santo*
*vasantavallokahitaṁ carantaḥ /*
*tīrṇāḥ svayaṁ bhīmabhavārṇavaṁ janā-*
*nahetunānyānapi tārayantaḥ // 37//*

अयं स्वभावः स्वत एव यत्पर
श्रमापनोदप्रवणं महात्मनाम् ।
सुधांशुरेष स्वयमर्ककर्कश-
प्रभाभितप्तामवति क्षितिं किल ॥ ३८ ॥

*ayaṁ svabhāvaḥ svata eva yatpara-*
*śramāpanodapravaṇaṁ mahātmanām /*
*sudhāṁśureṣa svayamarkakarkaśa-*
*prabhābhitaptāmavati kṣitiṁ kila // 38//*

ब्रह्मानन्दरसानुभूतिकलितैः पूर्तैः सुशीतैर्युतैः

युष्मद्वाक्कलशोज्झितैः श्रुतिसुखैर्वाक्यामृतैः सेचय ।

संतप्तं भवतापदावदहनज्वालाभिरेनं प्रभो

धन्यास्ते भवदीक्षणक्षणगतेः पात्रीकृताः स्वीकृताः ॥ ३९ ॥

*brahmānandarasānubhūtikalitaiḥ pūrtaiḥ suśītairyutaiḥ*
*yuṣmadvākkalaśojjhitaiḥ śrutisukhairvākyāmṛtaiḥ secaya |*
*santaptaṁ bhavatāpadāvadahanajvālābhirenaṁ prabho*
*dhanyāste bhavadīkṣaṇakṣaṇagateḥ pātrīkṛtāḥ svīkṛtāḥ || 39||*

कथं तरेयं भवसिन्धुमेतं

का वा गतिर्मे कतमोऽस्त्युपायः ।

जाने न किञ्चित्कृपयाऽव मां प्रभो

संसारदुःखक्षतिमातनुष्व ॥ ४० ॥

*kathaṁ tareyaṁ bhavasindhumetaṁ*
*kā vā gatirme katamo'styupāyaḥ |*
*jāne na kiñcitkṛpayā'va māṁ prabho*
*saṁsāraduḥkhakṣatimātanuṣva || 40||*

तथा वदन्तं शरणागतं स्वं

संसारदावानलतापतप्तम् ।

निरीक्ष्य कारुण्यरसार्द्रदृष्ट्या

दद्यादभीतिं सहसा महात्मा ॥ ४१ ॥

*tathā vadantaṁ śaraṇāgataṁ svaṁ*
*saṁsāradāvānalatāpataptam |*
*nirīkṣya kāruṇyarasārdradṛṣṭyā*
*dadyādabhītiṁ sahasā mahātmā ||* ***41****||*

विद्वान् स तस्मा उपसत्तिमीयुषे

मुमुक्षवे साधु यथोक्तकारिणे ।

प्रशान्तचित्ताय शमान्विताय

तत्त्वोपदेशं कृपयैव कुर्यात् ॥ ४२ ॥

*vidvān sa tasmā upasattimīyuṣe*
*mumukṣave sādhu yathoktakāriṇe |*
*praśāntacittāya śamānvitāya*
*tattvopadeśaṁ kṛpayaiva kuryāt ||* ***42****||*

मा भैष्ट विद्वंस्तव नास्त्यपायः

संसारसिन्धोस्तरणेऽस्त्युपायः ।

येनैव याता यतयोऽस्य पारं

तमेव मार्गं तव निर्दिशामि ॥ ४३ ॥

*mā bhaiṣṭa vidvaṁstava nāstyapāyaḥ*
*saṁsārasindhostaraṇe'styupāyaḥ |*
*yenaiva yātā yatayo'sya pāraṁ*
*tameva mārgaṁ tava nirdiśāmi ||* ***43****||*

अस्त्युपायो महान्कश्चित्संसारभयनाशनः।
तेन तीर्त्वा भवाम्भोधिं परमानन्दमाप्स्यसि॥ ४४॥

*astyupāyo mahānkaścitsaṁsārabhayanāśanaḥ |*
*tena tīrtvā bhavāmbhodhiṁ paramānandamāpsyasi ||* ***44****||*

वेदान्तार्थविचारेण जायते ज्ञानमुत्तमम्।
तेनात्यन्तिकसंसारदुःखनाशो भवत्यनु॥ ४५॥

*vedāntārthavicāreṇa jāyate jñānamuttamam |*
*tenātyantikasaṁsāraduḥkhanāśo bhavatyanu ||* ***45****||*

श्रद्धाभक्तिध्यानयोगाम्मुमुक्षोः
मुक्तेर्हेतून्वक्ति साक्षाच्छ्रुतेर्गीः।
यो वा एतेष्वेव तिष्ठत्यमुष्य
मोक्षोऽविद्याकल्पिताद्देहबन्धात्॥ ४६॥

*śraddhābhaktidhyānayogāmmumukṣoḥ*
*mukterhetūnvakti sākṣācchrutergīḥ |*
*yo vā eteṣveva tiṣṭhatyamuṣya*
*mokṣo'vidyākalpitāddehabandhāt ||* ***46****||*

अज्ञानयोगात्परमात्मनस्तव
ह्यनात्मबन्धस्तत एव संसृतिः।
तयोर्विवेकोदितबोधवह्निः
अज्ञानकार्यं प्रदहेत्समूलम्॥ ४७॥

*ajñānayogātparamātmanastava*
*hyanātmabandhastata eva saṁsṛtiḥ |*
*tayorvivekoditabodhavahniḥ*
*ajñānakāryaṁ pradahetsamūlam || 47||*

शिष्य उवाच।
कृपया श्रूयतां स्वामिन्प्रश्नोऽयं क्रियते मया।
यदुत्तरमहं श्रुत्वा कृतार्थः स्यां भवन्मुखात्॥ ४८॥

*śiṣya uvāca |*
*kṛpayā śrūyatāṁ svāminpraśno'yaṁ kriyate mayā |*
*yaduttaramahaṁ śrutvā kṛtārthaḥ syāṁ bhavanmukhāt ||* ***48****||*

को नाम बन्धः कथमेष आगतः
कथं प्रतिष्ठास्य कथं विमोक्षः।
कोऽसावनात्मा परमः क आत्मा
तयोर्विवेकः कथमेतदुच्यताम्॥ ४९॥

*ko nāma bandhaḥ kathameṣa āgataḥ*
*kathaṁ pratiṣṭhāsya kathaṁ vimokṣḥ |*
*ko'sāvanātmā paramaḥ ka ātmā*
*tayorvivekaḥ kathametaducyatām ||* ***49****||*

श्रीगुरुरुवाच।
धन्योऽसि कृतकृत्योऽसि पावितं ते कुलं त्वया।
यदविद्याबन्धमुक्त्या ब्रह्मीभवितुमिच्छसि॥ ५०॥

*śrīgururuvāca |*
*dhanyo'si kṛtakṛtyo'si pāvitaṁ te kulaṁ tvayā |*
*yadavidyābandhamuktyā brahmībhavitumicchasi || **50**||*

ऋणमोचनकर्तारः पितुः सन्ति सुतादयः।

बन्धमोचनकर्ता तु स्वस्मादन्यो न कश्चन॥ **५१**॥

*ṛṇamocanakartāraḥ pituḥ santi sutādayaḥ |*
*bandhamocanakartā tu svasmādanyo na kaścana || **51**||*

मस्तकन्यस्तभारादेर्दुःखमन्यैर्निवार्यते।

क्षुधादिकृतदुःखं तु विना स्वेन न केनचित्॥ **५२**॥

*mastakanyastabhārāderduḥkhamanyairnivāryate |*
*kṣudhādikṛtaduḥkhaṁ tu vinā svena na kenacit || **52**||*

पथ्यमौषधसेवा च क्रियते येन रोगिणा।

आरोग्यसिद्धिर्दृष्टाऽस्य नान्यानुष्ठितकर्मणा॥ **५३**॥

*pathyamauṣadhasevā ca kriyate yena rogiṇā |*
*ārogyasiddhirdṛṣṭā'sya nānyānuṣṭhitakarmaṇā || **53**||*

वस्तुस्वरूपं स्फुटबोधचक्षुषा

स्वेनैव वेद्यं न तु पण्डितेन।

चन्द्रस्वरूपं निजचक्षुषैव

ज्ञातव्यमन्यैरवगम्यते किम्॥ **५४**॥

*vastusvarūpaṁ sphuṭabodhacakṣuṣā*
*svenaiva vedyaṁ na tu paṇḍitena |*
*candrasvarūpaṁ nijacakṣuṣaiva*
*jñātavyamanyairavagamyate kim || **54**||*

अविद्याकामकर्मादिपाशबन्धं विमोचितुम् ।
कः शक्नुयाद्विनात्मानं कल्पकोटिशतैरपि ॥ ५५ ॥

*avidyākāmakarmādipāśabandhaṁ vimocitum |*
*kaḥ śaknuyādvinātmānaṁ kalpakoṭiśatairapi || **55**||*

न योगेन न सांख्येन कर्मणा नो न विद्यया ।
ब्रह्मात्मैकत्वबोधेन मोक्षः सिध्यति नान्यथा ॥ ५६ ॥

*na yogena na sāṅkhyena karmaṇā no na vidyayā |*
*brahmātmaikatvabodhena mokṣaḥ sidhyati nānyathā || **56**||*

वीणाया रूपसौन्दर्यं तन्त्रीवादनसौष्ठवम् ।
प्रजारञ्जनमात्रं तन्न साम्राज्याय कल्पते ॥ ५७ ॥

*vīṇāyā rūpasaundaryaṁ tantrīvādanasauṣṭhavam |*
*prajārañjanamātraṁ tanna sāmrājyāya kalpate || **57**||*

वाग्वैखरी शब्दझरी शास्त्रव्याख्यानकौशलम् ।
वैदुष्यं विदुषां तद्वद्भुक्तये न तु मुक्तये ॥ ५८ ॥

*vāgvaikharī śabdajharī śāstravyākhyānakauśalam |*
*vaiduṣyaṁ viduṣāṁ tadvadbhuktaye na tu muktaye || **58**||*

अविज्ञाते परे तत्त्वे शास्त्राधीतिस्तु निष्फला ।
विज्ञातेऽपि परे तत्त्वे शास्त्राधीतिस्तु निष्फला ॥ ५९ ॥

*avijñāte pare tattve śāstrādhītistu niṣphalā |*
*vijñāte'pi pare tattve śāstrādhītistu niṣphalā || **59**||*

शब्दजालं महारण्यं चित्तभ्रमणकारणम् ।
अतः प्रयत्नाज्ज्ञातव्यं तत्त्वज्ञैस्तत्त्वमात्मनः ॥ ६० ॥

*śabdajālaṁ mahāraṇyaṁ cittabhramaṇakāraṇam |*
*ataḥ prayatnājjñātavyaṁ tattvajñaistattvamātmanaḥ || **60**||*

अज्ञानसर्पदष्टस्य ब्रह्मज्ञानौषधं विना ।
किमु वेदैश्च शास्त्रैश्च किमु मन्त्रैः किमौषधैः ॥ ६१ ॥

*ajñānasarpadaṣṭasya brahmajñānauṣadhaṁ vinā |*
*kimu vedaiśca śāstraiśca kimu mantraiḥ kimauṣadhaiḥ || **61**||*

न गच्छति विना पानं व्याधिरौषधशब्दतः ।
विनाऽपरोक्षानुभवं ब्रह्मशब्दैर्न मुच्यते ॥ ६२ ॥

*na gacchati vinā pānaṁ vyādhirauṣadhaśabdataḥ |*
*vinā'parokṣānubhavaṁ brahmaśabdairna mucyate || **62**||*

अकृत्वा दृश्यविलयमज्ञात्वा तत्त्वमात्मनः ।
ब्रह्मशब्दैः कुतो मुक्तिरुक्तिमात्रफलैर्नृणाम् ॥ ६३ ॥

*akṛtvā dṛśyavilayamajñātvā tattvamātmanaḥ |*
*brahmaśabdaiḥ kuto muktiruktimātraphalairnṛṇām || **63**||*

अकृत्वा शत्रुसंहारमगत्वाखिलभूश्रियम् ।
राजाहमिति शब्दाद्रो राजा भवितुमर्हति ॥ ६४ ॥

*akṛtvā śatrusaṁhāramagatvākhilabhūśriyam /*
*rājāhamiti śabdānno rājā bhavitumarhati //* ***64****//*

आप्तोक्तिं खननं तथोपरिशिलाद्युत्कर्षणं स्वीकृतिं
निक्षेपः समपेक्षते नहि बहिः शब्दैस्तु निर्गच्छति ।
तद्वद्खेब्रह्मविदोपदेशमननध्यानादिभिर्लभ्यते
मायाकार्यतिरोहितं स्वममलं तत्त्वं न दुर्युक्तिभिः ॥ ६५ ॥

*āptoktiṁ khananaṁ tathopariśilādyutkarṣaṇaṁ svīkṛtiṁ*
*nikṣepaḥ samapekṣate nahi bahiḥ śabdaistu nirgacchati /*
*tadvadbrahmavidopadeśamananadhyānādibhirlabhyate*
*māyākāryatirohitaṁ svamamalaṁ tattvaṁ*
*na duryuktibhiḥ //* ***65****//*

तस्मात्सर्वप्रयत्नेन भवबन्धविमुक्तये ।
स्वैरेव यत्नः कर्तव्यो रोगादाविव पण्डितैः ॥ ६६ ॥

*tasmātsarvaprayatnena bhavabandhavimuktaye /*
*svaireva yatnaḥ kartavyo rogādāviva paṇḍitaiḥ //* ***66****//*

यस्त्वयाद्य कृतः प्रश्नो वरीयाञ्छास्त्रविन्मतः ।
सूत्रप्रायो निगूढार्थो ज्ञातव्यश्च मुमुक्षुभिः ॥ ६७ ॥

*yastvayādya kṛtaḥ praśno varīyāñchāstravinmataḥ /*
*sūtraprāyo nigūḍhārtho jñātavyaśca mumukṣubhiḥ //* ***67****//*

शृणुष्वावहितो विद्वन्यन्मया समुदीर्यते ।

तदेतच्छ्रवणात्सद्यो भवबन्धाद्विमोक्ष्यसे ॥ ६८ ॥

*śṛṇuṣvāvahito vidvanyanmayā samudīryate |*
*tadetacchravaṇātsadyo bhavabandhādvimokṣyase || 68||*

मोक्षस्य हेतुः प्रथमो निगद्यते

वैराग्यमत्यन्तमनित्यवस्तुषु ।

ततः शमश्चापि दमस्तितिक्षा

न्यासः प्रसक्ताखिलकर्मणां भृशम् ॥ ६९ ॥

*mokṣasya hetuḥ prathamo nigadyate*
*vairāgyamatyantamanityavastuṣu |*
*tataḥ śamaścāpi damastitikṣā*
*nyāsaḥ prasaktākhilakarmaṇāṁ bhṛśam || 69||*

ततः श्रुतिस्तन्मननं सतत्त्व-

ध्यानं चिरं नित्यनिरन्तरं मुनेः ।

ततोऽविकल्पं परमेत्य विद्वान्

इहैव निर्वाणसुखं समृच्छति ॥ ७० ॥

*tataḥ śrtistanmananaṁ satattva-*
*dhyānaṁ ciraṁ nityanirantaraṁ muneḥ |*
*tato'vikalpaṁ parametya vidvān*
*ihaiva nirvāṇasukhaṁ samṛcchati || 70||*

यद्बोद्धव्यं तवेदानीमात्मानात्मविवेचनम् ।

तदुच्यते मया सम्यक्छ्रुत्वात्मन्यवधारय ॥ ७१ ॥

*yadboddhavyaṁ tavedānīmātmānātmavivecanam |*
*taducyate mayā samyak śrutvātmanyavadhāraya || **71**||*

मज्जास्थिमेदःपलरक्तचर्म-

त्वगाह्वयैर्धातुभिरेभिरन्वितम् ।

पादोरुवक्षोभुजपृष्ठमस्तकैः

अङ्गैरुपाङ्गैरुपयुक्तमेतत् ॥ ७२ ॥

*majjāsthimedaḥpalaraktacarma-*
*tvagāhvayairdhātubhirebhiranvitam |*
*pādoruvakṣobhujapṛṣṭhamastakaiḥ*
*aṅgairupāṅgairupayuktametat || **72**||*

अहंममेतिप्रथितं शरीरं

मोहास्पदं स्थूलमितीर्यते बुधैः ।

नभोनभस्वद्दहनाम्बुभूमयः

सूक्ष्माणि भूतानि भवन्ति तानि ॥ ७३ ॥

*ahammametiprathitaṁ śarīraṁ*
*mohāspadaṁ sthūlamitīryate budhaiḥ |*
*nabhonabhasvaddahanāmbubhūmayaḥ*
*sūkṣmāṇi bhūtāni bhavanti tāni || **73**||*

परस्परांशैर्मिलितानि भूत्वा

स्थूलानि च स्थूलशरीरहेतवः ।

मात्रास्तदीया विषया भवन्ति

शब्दादयः पञ्च सुखाय भोक्तुः ॥ ७४ ॥

*parasparāṁśairmilitāni bhūtvā*
*sthūlāni ca sthūlaśarīrahetavaḥ* /
*mātrāstadīyā viṣayā bhavanti*
*śabdādayaḥ pañca sukhāya bhoktuḥ* // 74//

य एषु मूढा विषयेषु बद्धा

रागोरुपाशेन सुदुर्दमेन ।

आयान्ति निर्यान्त्यध ऊर्ध्वमुच्चैः

स्वकर्मदूतेन जवेन नीताः ॥ ७५ ॥

*ya eṣu mūḍhā viṣayeṣu baddhā*
*rāgorupāśena sudurdamena* /
*āyānti niryāntyadha ūrdhvamuccaiḥ*
*svakarmadūtena javena nītāḥ* // 75//

शब्दादिभिः पञ्चभिरेव पञ्च

पञ्चत्वमापुः स्वगुणेन बद्धाः ।

कुरङ्गमातङ्गपतङ्गमीन

भृङ्गा नरः पञ्चभिरञ्चितः किम् ॥ ७६ ॥

*śabdādibhiḥ pañcabhireva pañca*
*pañcatvamāpuḥ svaguṇena baddhāḥ |*
*kuraṅgamātaṅgapataṅgamīna-*
*bhṛṅgā naraḥ pañcabhirañcitaḥ kim || 76||*

दोषेण तीव्रो विषयः कृष्णसर्पविषादपि ।
विषं निहन्ति भोक्तारं द्रष्टारं चक्षुषाप्ययम् ॥ ७७ ॥

*doṣeṇa tīvro viṣayaḥ kṛṣṇasarpaviṣādapi |*
*viṣaṁ nihanti bhoktāraṁ draṣṭāraṁ cakṣuṣāpyayam || 77||*

विषयाशामहापाशाद्यो विमुक्तः सुदुस्त्यजात् ।
स एव कल्पते मुक्त्यै नान्यः षटखेशास्त्रवेद्यपि ॥ ७८ ॥

*viṣayāśāmahāpāśādyo vimuktaḥ sudustyajāt |*
*sa eva kalpate muktyai nānyaḥ ṣaṭśāstravedyapi || 78||*

आपातवैराग्यवतो मुमुक्षून्
भवाब्धिपारं प्रतियातुमुद्यतान् ।
आशाग्रहो मज्जयतेऽन्तराले
निगृह्य कण्ठे विनिवर्त्य वेगात् ॥ ७९ ॥

*āpātavairāgyavato mumukṣūn*
*bhavābdhipāraṁ pratiyātumudyatān |*
*āśāgraho majjayate'ntarāle*
*nigṛhya kaṇṭhe vinivartya vegāt || 79||*

विषयाख्यग्रहो येन सुविरक्त्यसिना हतः।
स गच्छति भवाम्भोधेः पारं प्रत्यूहवर्जितः॥ ८०॥

*viṣayākhyagraho yena suviraktyasinā hataḥ |*
*sa gacchati bhavāmbhodheḥ pāraṁ pratyūhavarjitaḥ || **80**||*

विषमविषयमार्गैर्गच्छतोऽनच्छबुद्धेः
प्रतिपदमभियातो मृत्युरप्येष विद्धि।
हितसुजनगुरुक्त्या गच्छतः स्वस्य युक्त्या
प्रभवति फलसिद्धिः सत्यमित्येव विद्धि॥ ८१॥

*viṣamaviṣayamārgairgacchato'nacchabuddheḥ*
*pratipadamabhiyāto mṛtyurapyeṣa viddhi |*
*hitasujanaguruktyā gacchataḥ svasya yuktyā*
*prabhavati phalasiddhiḥ satyamityeva viddhi || **81**||*

मोक्षस्य कांक्षा यदि वै तवास्ति
त्यजातिदूराद्विषयान्विषं यथा।
पीयूषवत्तोषदयाक्षमार्जव-
प्रशान्तिदान्तीर्भज नित्यमादरात्॥ ८२॥

*mokṣasya kāṅkṣā yadi vai tavāsti*
*tyajātidūrādviṣayānviṣaṁ yathā |*
*pīyūṣavattoṣadayākṣamārjava-*
*praśāntidāntīrbhaja nityamādarāt || **82**||*

अनुक्षणं यत्परिहृत्य कृत्यं
अनाद्यविद्याकृतबन्धमोक्षणम्।
देहः परार्थोऽयममुष्य पोषणे
यः सज्जते स स्वमनेन हन्ति॥ ८३॥

*anukṣaṇaṁ yatparihṛtya kṛtyaṁ*
*anādyavidyākṛtabandhamokṣaṇam /*
*dehaḥ parārtho'yamamuṣya poṣaṇe*
*yaḥ sajjate sa svamanena hanti // **83**//*

शरीरपोषणार्थी सन् य आत्मानं दिदृक्षति।
ग्राहं दारुधिया धृत्वा नदिं तर्तुं स गच्छति॥ ८४॥

*śarīrapoṣaṇārthī san ya ātmānaṁ didṛkṣati /*
*grāhaṁ dārudhiyā dhṛtvā nadi tartuṁ sa gacchati // **84**//*

मोह एव महामृत्युर्मुमुक्षोर्वपुरादिषु।
मोहो विनिर्जितो येन स मुक्तिपदमर्हति॥ ८५॥

*moha eva mahāmṛtyurmumukṣorvapurādiṣu /*
*moho vinirjito yena sa muktipadamarhati // **85**//*

मोहं जहि महामृत्युं देहदारसुतादिषु।
यं जित्वा मुनयो यान्ति तद्विष्णोः परमं पदम्॥ ८६॥

*mohaṁ jahi mahāmṛtyuṁ dehadārasutādiṣu /*
*yaṁ jitvā munayo yānti tadviṣṇoḥ paramaṁ padam // **86**//*

त्वङ्खेमांसरुधिरस्नायुमेदोमज्जास्थिसंकुलम् ।

पूर्णं मूत्रपुरीषाभ्यां स्थूलं निन्द्यमिदं वपुः ॥ ८७ ॥

*tvaṅmāṁsarudhirasnāyumedomajjāsthisaṅkulam |*
*pūrṇaṁ mūtrapurīṣābhyāṁ sthūlaṁ*
*nindyamidaṁ vapuḥ || **87**||*

पञ्चीकृतेभ्यो भूतेभ्यः स्थूलेभ्यः पूर्वकर्मणा ।

समुत्पन्नमिदं स्थूलं भोगायतनमात्मनः ।

अवस्था जागरस्तस्य स्थूलार्थानुभवो यतः ॥ ८८ ॥

*pañcīkṛtebhyo bhūtebhyaḥ sthūlebhyaḥ pūrvakarmaṇā |*
*samutpannamidaṁ sthūlaṁ bhogāyatanamātmanaḥ |*
*avasthā jāgarastasya sthūlārthānubhavo yataḥ || **88**||*

बाह्येन्द्रियैः स्थूलपदार्थसेवां

स्रक्खेचन्दनस्त्र्यादिविचित्ररूपाम् ।

करोति जीवः स्वयमेतदात्मना

तस्मात्प्रशस्तिर्वपुषोऽस्य जागरे ॥ ८९ ॥

*bāhyendriyaiḥ sthūlapadārthasevāṁ*
*srakcandanastryādivicitrarūpām |*
*karoti jīvaḥ svayametadātmanā*
*tasmātpraśastirvapuṣo'sya jāgare || **89**||*

सर्वाऽपि बाह्यसंसारः पुरुषस्य यदाश्रयः।
विद्धि देहमिदं स्थूलं गृहवद्गृहमेधिनः॥ ९०॥

*sarvā'pi bāhyasaṁsāraḥ puruṣasya yadāśrayaḥ |*
*viddhi dehamidaṁ sthūlaṁ gṛhavadgṛhamedhinaḥ || 90||*

स्थूलस्य सम्भवजरामरणानि धर्माः
स्थौल्यादयो बहुविधाः शिशुताद्यवस्थाः।
वर्णाश्रमादिनियमा बहुधाऽमयाः स्युः
पूजावमानबहुमानमुखा विशेषाः॥ ९१॥

*sthūlasya sambhavajarāmaraṇāni dharmāḥ*
*sthaulyādayo bahuvidhāḥ śiśutādyavasthāḥ |*
*varṇāśramādiniyamā bahudhā'mayāḥ syuḥ*
*pūjāvamānabahumānamukhā viśeṣāḥ || 91||*

बुद्धीन्द्रियाणि श्रवणं त्वगक्षि
घ्राणं च जिव्हा विषयावबोधनात्।
वाकखेपाणिपादा गुदमप्युपस्थः
कर्मेन्द्रियाणि प्रवणेन कर्मसु॥ ९२॥

*buddhīndriyāṇi śravaṇaṁ tvagakṣi*
*ghrāṇaṁ ca jivhā viṣayāvabodhanāt |*
*vākpāṇipādā gudamapyupasthaḥ*
*karmendriyāṇi pravaṇena karmasu || 92||*

निगद्यतेऽन्तःकरणं मनोधीः

अहंकृतिश्चित्तमिति स्ववृत्तिभिः ।

मनस्तु संकल्पविकल्पनादिभिः

बुद्धिः पदार्थाध्यवसायधर्मतः ॥ ९३ ॥

*nigadyate'ntaḥkaraṇaṁ manodhīḥ*
*ahaṅkṛtiścittamiti svavṛttibhiḥ /*
*manastu saṅkalpavikalpanādibhiḥ*
*buddhiḥ padārthādhyavasāyadharmataḥ // 93//*

अत्राभिमानादहमित्यहंकृतिः ।

स्वार्थानुसन्धानगुणेन चित्तम् ॥ ९४ ॥

*atrābhimānādahamityahaṅkṛtiḥ /*
*svārthānusandhānaguṇena cittam // 94//*

प्राणापानव्यानोदानसमाना भवत्यसौ प्राणः ।

स्वयमेव वृत्तिभेदाद्विकृतिभेदात्सुवर्णसलिलादिवत् ॥ 95 ॥

*prāṇāpānavyānodānasamānā bhavatyasau prāṇaḥ /*
*svayameva vṛttibhedādvikṛtibhedātsuvarṇasalilādivat // 95//*

वागादि पञ्च श्रवणादि पञ्च

प्राणादि पञ्चाभ्रमुखानि पञ्च ।

बुद्ध्याद्यविद्यापि च कामकर्मणी

पुर्यष्टकं सूक्ष्मशरीरमाहुः ॥ ९६ ॥

*vāgādi pañca śravaṇādi pañca*
*prāṇādi pañcābhramukhāni pañca |*
*buddhyādyavidyāpi ca kāmakarmaṇī*
*puryaṣṭakaṁ sūkṣmaśarīramāhuḥ ||* ***96****||*

इदं शरीरं शृणु सूक्ष्मसंज्ञितं
लिङ्गं त्वपञ्चीकृतभूतसम्भवम् ।
सवासनं कर्मफलानुभावकं
स्वाज्ञानतोऽनादिरुपाधिरात्मनः ॥ ९७ ॥

*idaṁ śarīraṁ śṛṇu sūkṣmasañjñitaṁ*
*liṅgaṁ tvapañcīkṛtabhūtasambhavam |*
*savāsanaṁ karmaphalānubhāvakaṁ*
*svājñānato'nādirupādhirātmanaḥ ||* ***97****||*

स्वप्नो भवत्यस्य विभक्त्यवस्था
स्वमात्रशेषेण विभाति यत्र ।
स्वप्ने तु बुद्धिः स्वयमेव जाग्रत्
कालीननानाविधवासनाभिः ॥ ९८ ॥

*svapno bhavatyasya vibhaktyavasthā*
*svamātraśeṣeṇa vibhāti yatra |*
*svapne tu buddhiḥ svayameva jāgrat*
*kālīnanānāvidhavāsanābhiḥ ||* ***98****||*

कर्त्रादिभावं प्रतिपद्य राजते
यत्र स्वयं भाति ह्ययं परात्मा ।
धीमात्रकोपाधिरशेषसाक्षी
न लिप्यते तत्कृतकर्मलेशैः ।
यस्मादसङ्गस्तत एव कर्मभिः
न लिप्यते किञ्चिदुपाधिना कृतैः ॥ ९९ ॥

*kartrādibhāvaṁ pratipadya rājate*
*yatra svayaṁ bhāti hyayaṁ parātmā |*
*dhīmātrakopādhiraśeṣasākṣī*
*na lipyate tatkṛtakarmaleśaiḥ |*
*yasmādasaṅgastata eva karmabhiḥ*
*na lipyate kiñcidupādhinā kṛtaiḥ || 99||*

सर्वव्यापृतिकरणं लिङ्गमिदं स्याच्चिदात्मनः पुंसः ।
वास्यादिकमिव तक्ष्णस्तेनैवात्मा भवत्यसङ्गोऽयम् ॥ १०० ॥

*sarvavyāpṛtikaraṇaṁ liṅgamidaṁ syāccidātmanaḥ puṁsaḥ |*
*vāsyādikamiva takṣṇastenaivātmā bhavatyasaṅgo'yam || 100||*

अन्धत्वमन्दत्वपटुत्वधर्माः
सौगुण्यवैगुण्यवशाद्धि चक्षुषः ।
बाधिर्यमूकत्वमुखास्तथैव
श्रोत्रादिधर्मा न तु वेत्तुरात्मनः ॥ १०१ ॥

*andhatvamandatvapaṭutvadharmāḥ*
*sauguṇyavaiguṇyavaśāddhi cakṣuṣaḥ |*
*bādhiryamūkatvamukhāstathaiva*
*śrotrādidharmā na tu vetturātmanaḥ || 101||*

उच्छ्वासनिःश्वासविजृम्भणक्षुत्
प्रस्यन्दनाद्युत्क्रमणादिकाः क्रियाः ।
प्राणादिकर्माणि वदन्ति तज्ज्ञाः
प्राणस्य धर्मावशनापिपासे ॥ १०२ ॥

*ucchvāsaniḥśvāsavijṛmbhaṇakṣut*
*prasyandanādyutkramaṇādikāḥ kriyāḥ |*
*prāṇādikarmāṇi vadanti tajñāḥ*
*prāṇasya dharmāvaśanāpipāse || 102||*

अन्तःकरणमेतेषु चक्षुरादिषु वर्ष्मणि ।
अहमित्यभिमानेन तिष्ठत्याभासतेजसा ॥ १०३ ॥

*antaḥkaraṇameteṣu cakṣurādiṣu varṣmaṇi |*
*ahamityabhimānena tiṣṭhatyābhāsatejasā || 103||*

अहंकारः स विज्ञेयः कर्ता भोक्ताभिमान्ययम् ।
सत्त्वादिगुणयोगेन चावस्थात्रयमश्नुते ॥ १०४ ॥

*ahaṅkāraḥ sa vijñeyaḥ kartā bhoktābhimānyayam |*
*sattvādiguṇayogena cāvasthātrayamaśnute || 104||*

विषयाणामानुकूल्ये सुखी दुःखी विपर्यये ।

सुखं दुःखं च तद्धर्मः सदानन्दस्य नात्मनः ॥ **१०५** ॥

*viṣayāṇāmānukūlye sukhī duḥkhī viparyaye |*
*sukhaṁ duḥkhaṁ ca taddharmaḥ*
*sadānandasya nātmanaḥ ||* **105***||*

आत्मार्थत्वेन हि प्रेयान्विषयो न स्वतः प्रियः ।

स्वत एव हि सर्वेषामात्मा प्रियतमो यतः

तत आत्मा सदानन्दो नास्य दुःखं कदाचन ॥ **१०६** ॥

*ātmārthatvena hi preyānviṣayo na svataḥ priyaḥ |*
*svata eva hi sarveṣāmātmā priyatamo yataḥ*
*tata ātmā sadānando nāsya duḥkhaṁ kadācana ||* **106***||*

यत्सुषुप्तौ निर्विषय आत्मानन्दोऽनुभूयते ।

श्रुतिः प्रत्यक्षमैतिह्यमनुमानं च जाग्रति ॥ **१०७** ॥

*yatsuṣuptau nirviṣaya ātmānando'nubhūyate |*
*śrutiḥ pratyakṣamaitihyamanumānaṁ ca jāgrati ||* **107***||*

अव्यक्तनाम्नी परमेशशक्तिः

अनाद्यविद्या त्रिगुणात्मिका परा ।

कार्यानुमेया सुधियैव माया

यया जगत्सर्वमिदं प्रसूयते ॥ **१०८** ॥

*avyaktanāmnī parameśaśaktiḥ*
*anādyavidyā triguṇātmikā parā /*
*kāryānumeyā sudhiyaiva māyā*
*yayā jagatsarvamidaṁ prasūyate // 108//*

सद्राप्यसद्राप्युभयात्मिका नो
भिद्राप्यभिद्राप्युभयात्मिका नो ।
साङ्गाप्यनङ्गा ह्युभयात्मिका नो
महाद्भुताऽनिर्वचनीयरूपा ॥ १०९ ॥

*sannāpyasannāpyubhayātmikā no*
*bhinnāpyabhinnāpyubhayātmikā no /*
*sāṅgāpyanaṅgā hyubhayātmikā no*
*mahādbhutā'nirvacanīyarūpā // 109//*

शुद्धाद्वयब्रह्मविबोधनाश्या
सर्पभ्रमो रज्जुविवेकतो यथा ।
रजस्तमःसत्त्वमिति प्रसिद्धा
गुणास्तदीयाः प्रथितैः स्वकार्यैः ॥ ११० ॥

*śuddhādvayabrahmavibodhanāśyā*
*sarpabhramo rajjuvivekato yathā /*
*rajastamaḥsattvamiti prasiddhā*
*guṇāstadīyāḥ prathitaiḥ svakāryaiḥ // 110//*

विक्षेपशक्ती रजसः क्रियात्मिका

यतः प्रवृत्तिः प्रसृता पुराणी ।

रागादयोऽस्याः प्रभवन्ति नित्यं

दुःखादयो ये मनसो विकाराः ॥ **१११** ॥

*vikṣepaśaktī rajasaḥ kriyātmikā*
*yataḥ pravṛttiḥ prasṛtā purāṇī |*
*rāgādayo'syāḥ prabhavanti nityaṁ*
*duḥkhādayo ye manaso vikārāḥ ||* ***111****||*

कामः क्रोधो लोभदम्भाद्यसूया

अहंकारेर्ष्यामत्सराद्यास्तु घोराः ।

धर्मा एते राजसाः पुम्प्रवृत्तिः

यस्मादेषा तद्रजो बन्धहेतुः ॥ **११२** ॥

*kāmaḥ krodho lobhadambhādyasūyā*
*ahaṅkārerṣyāmatsarādyāstu ghorāḥ |*
*dharmā ete rājasāḥ pumpravṛttiḥ*
*yasmādeṣā tadrajo bandhahetuḥ ||* ***112****||*

एषाऽऽवृतिर्नाम तमोगुणस्य

शक्तिर्मया वस्त्ववभासतेऽन्यथा ।

सैषा निदानं पुरुषस्य संसृतेः

विक्षेपशक्तेः प्रवणस्य हेतुः ॥ **११३** ॥

*eṣā''vṛtirnāma tamoguṇasya*
*śaktirmayā vastvavabhāsate'nyathā |*
*saiṣā nidānaṁ puruṣasya saṁsṛteḥ*
*vikṣepaśakteḥ pravaṇasya hetuḥ || **113**||*

प्रज्ञावानपि पण्डितोऽपि चतुरोऽप्यत्यन्तसूक्ष्मात्मदृग्-
व्यालीढस्तमसा न वेत्ति बहुधा संबोधितोऽपि स्फुटम् ।
भ्रान्त्यारोपितमेव साधु कलयत्यालम्बते तद्गुणान्
हन्तासौ प्रबला दुरन्ततमसः शक्तिर्महत्यावृतिः ॥ **११४** ॥

*prajñāvānapi paṇḍito'pi caturo'pyatyantasūkṣmātmadṛg-*
*vyālīḍhastamasā na vetti bahudhā sambodhito'pi sphuṭam |*
*bhrāntyāropitameva sādhu kalayatyālambate tadguṇān*
*hantāsau prabalā durantatamasaḥ śaktirmahatyāvṛtiḥ || **114**||*

अभावना वा विपरीतभावना
असंभावना विप्रतिपत्तिरस्याः ।
संसर्गयुक्तं न विमुञ्चति ध्रुवं
विक्षेपशक्तिः क्षपयत्यजस्रम् ॥ **११५** ॥

*abhāvanā vā viparītabhāvanā*
*asambhāvanā vipratipattirasyāḥ |*
*saṁsargayuktaṁ na vimuñcati dhruvaṁ*
*vikṣepaśaktiḥ kṣapayatyajasram || **115**||*

अज्ञानमालस्यजडत्वनिद्रा-

प्रमादमूढत्वमुखास्तमोगुणाः ।

एतैः प्रयुक्तो नहि वेत्ति किंचिन्

निद्रालुवत्स्तम्भवदेव तिष्ठति ॥ **११६** ॥

*ajñānamālasyajaḍatvanidrā-*
*pramādamūḍhatvamukhāstamoguṇāḥ* |
*etaiḥ prayukto nahi vetti kiñcin*
*nidrāluvatstambhavadeva tiṣṭhati* || ***116***||

सत्त्वं विशुद्धं जलवत्तथापि

ताभ्यां मिलित्वा सरणाय कल्पते ।

यत्रात्मबिम्बः प्रतिबिम्बितः सन्

प्रकाशयत्यर्क इवाखिलं जडम् ॥ **११७** ॥

*sattvaṁ viśuddhaṁ jalavattathāpi*
*tābhyāṁ militvā saraṇāya kalpate* |
*yatrātmabimbaḥ pratibimbitaḥ san*
*prakāśayatyarka ivākhilaṁ jaḍam* || ***117***||

मिश्रस्य सत्त्वस्य भवन्ति धर्माः

त्वमानिताद्या नियमा यमाद्याः ।

श्रद्धा च भक्तिश्च मुमुक्षता च

दैवी च सम्पत्तिरसद्निवृत्तिः ॥ **११८** ॥

*miśrasya sattvasya bhavanti dharmāḥ*
*tvamānitādyā niyamā yamādyāḥ |*
*śraddhā ca bhaktiśca mumukṣatā ca*
*daivī ca sampattirasannivṛttiḥ || **118**||*

विशुद्धसत्त्वस्य गुणाः प्रसादः
स्वात्मानुभूतिः परमा प्रशान्तिः ।
तृप्तिः प्रहर्षः परमात्मनिष्ठा
यया सदानन्दरसं समृच्छति ॥ ११९ ॥

*viśuddhasattvasya guṇāḥ prasādaḥ*
*svātmānubhūtiḥ paramā praśāntiḥ |*
*tṛptiḥ praharṣaḥ paramātmaniṣṭhā*
*yayā sadānandarasaṁ samṛcchati || **119**||*

अव्यक्तमेतत्त्रिगुणैर्निरुक्तं
तत्कारणं नाम शरीरमात्मनः ।
सुषुप्तिरेतस्य विभक्त्यवस्था
प्रलीनसर्वेन्द्रियबुद्धिवृत्तिः ॥ १२० ॥

*avyaktametattriguṇairniruktaṁ*
*tatkāraṇaṁ nāma śarīramātmanaḥ |*
*suṣuptiretasya vibhaktyavasthā*
*pralīnasarvendriyabuddhivṛttiḥ || **120**||*

सर्वप्रकारप्रमितिप्रशान्तिः

बीजात्मनावस्थितिरेव बुद्धेः ।

सुषुप्तिरेतस्य किल प्रतीतिः

किंचिद्र वेद्मीति जगत्प्रसिद्धेः ॥ १२१ ॥

*sarvaprakārapramitipraśāntiḥ*
*bījātmanāvasthitireva buddheḥ /*
*suṣuptiretasya kila pratītiḥ*
*kiñcinna vedmīti jagatprasiddheḥ //* ***121****//*

देहेन्द्रियप्राणमनोऽहमादयः

सर्वे विकारा विषयाः सुखादयः ।

व्योमादिभूतान्यखिलं न विश्वं

अव्यक्तपर्यन्तमिदं ह्यनात्मा ॥ १२२ ॥

*dehendriyaprāṇamano'hamādayaḥ*
*sarve vikārā viṣayāḥ sukhādayaḥ /*
*vyomādibhūtānyakhilaṁ na viśvaṁ*
*avyaktaparyantamidaṁ hyanātmā //* ***122****//*

माया मायाकार्यं सर्वं महदादिदेहपर्यन्तम् ।

असदिदमनात्मतत्त्वं विद्धि त्वं मरुमरीचिकाकल्पम् ॥ १२३ ॥

*māyā māyākāryaṁ sarvaṁ mahadādidehaparyantam /*
*asadidamanātmatattvaṁ viddhi tvaṁ*
*marumarīcikākalpam //* ***123****//*

अथ ते संप्रवक्ष्यामि स्वरूपं परमात्मनः ।
यद्विज्ञाय नरो बन्धान्मुक्तः कैवल्यमश्नुते ॥ १२४ ॥

*atha te sampravakṣyāmi svarūpaṁ paramātmanaḥ /*
*yadvijñāya naro bandhānmuktaḥ kaivalyamaśnute // **124**//*

अस्ति कश्चित्स्वयं नित्यमहंप्रत्ययलम्बनः ।
अवस्थात्रयसाक्षी सन्पञ्चकोशविलक्षणः ॥ १२५ ॥

*asti kaścitsvayaṁ nityamahampratyayalambanaḥ /*
*avasthātrayasākṣī sanpañcakośavilakṣaṇaḥ // **125**//*

यो विजानाति सकलं जाग्रत्स्वप्नसुषुप्तिषु ।
बुद्धितद्वृत्तिसद्भावमभावमहमित्ययम् ॥ १२६ ॥

*yo vijānāti sakalaṁ jāgratsvapnasuṣuptiṣu /*
*buddhitadvṛttisadbhāvamabhāvamahamityayam // **126**//*

यः पश्यति स्वयं सर्वं यं न पश्यति कश्चन ।
यश्चेतयति बुद्ध्यादि न तद्यं चेतयत्ययम् ॥ १२७ ॥

*yaḥ paśyati svayaṁ sarvaṁ yaṁ na paśyati kaścana /*
*yaścetayati buddhyādi na tadyaṁ cetayatyayam // **127**//*

येन विश्वमिदं व्याप्तं यं न व्याप्नोति किञ्चन ।
अभारूपमिदं सर्वं यं भान्त्यमनुभात्ययम् ॥ १२८ ॥

*yena viśvamidaṁ vyāptaṁ yaṁ na vyāpnoti kiñcana /*
*abhārūpamidaṁ sarvaṁ yaṁ bhāntyamanubhātyayam // **128**//*

यस्य सन्निधिमात्रेण देहेन्द्रियमनोधियः ।

विषयेषु स्वकीयेषु वर्तन्ते प्रेरिता इव ॥ १२९ ॥

*yasya sannidhimātreṇa dehendriyamanodhiyaḥ |*
*viṣayeṣu svakīyeṣu vartante preritā iva || 129||*

अहङ्कारादिदेहान्ता विषयाश्च सुखादयः ।

वेद्यन्ते घटवदखे येन नित्यबोधस्वरूपिणा ॥ १३० ॥

*ahaṅkārādidehāntā viṣayāśca sukhādayaḥ |*
*vedyante ghaṭavad yena nityabodhasvarūpiṇā || 130||*

एषोऽन्तरात्मा पुरुषः पुराणो

निरन्तराखण्डसुखानुभूतिः ।

सदैकरूपः प्रतिबोधमात्रो

येनेषिता वागसवश्चरन्ति ॥ १३१ ॥

*eṣo'ntarātmā puruṣaḥ purāṇo*
*nirantarākhaṇḍasukhānubhūtiḥ |*
*sadaikarūpaḥ pratibodhamātro*
*yeneṣitā vāgasavaścaranti || 131||*

अत्रैव सत्त्वात्मनि धीगुहायां

अव्याकृताकाश उशत्प्रकाशः ।

आकाश उच्चै रविवत्प्रकाशते

स्वतेजसा विश्वमिदं प्रकाशयन् ॥ १३२ ॥

*atraiva sattvātmani dhīguhāyāṁ*
*avyākṛtākāśa uśatprakāśaḥ |*
*ākāśa uccai ravivatprakāśate*
*svatejasā viśvamidaṁ prakāśayan ||* ***132****||*

ज्ञाता मनोऽहंकृतिविक्रियाणां
देहेन्द्रियप्राणकृतक्रियाणाम् ।
अयोऽग्निवत्तानुवर्तमानो
न चेष्टते नो विकरोति किञ्चन ॥ १३३ ॥

*jñātā mano'haṅkṛtivikriyāṇāṁ*
*dehendriyaprāṇakṛtakriyāṇām |*
*ayo'gnivattānanuvartamāno*
*na ceṣṭate no vikaroti kiñcana ||* ***133****||*

न जायते नो म्रियते न वर्धते
न क्षीयते नो विकरोति नित्यः ।
विलीयमानेऽपि वपुष्यमुष्मि-
न्न लीयते कुम्भ इवाम्बरं स्वयम् ॥ १३४ ॥

*na jāyate no mriyate na vardhate*
*na kṣīyate no vikaroti nityaḥ |*
*vilīyamāne'pi vapuṣyamuṣmi-*
*nna līyate kumbha ivāmbaraṁ svayam ||* ***134****||*

प्रकृतिविकृतिभिन्नः शुद्धबोधस्वभावः
सदसदिदमशेषं भासयन्निर्विशेषः।
विलसति परमात्मा जाग्रदादिष्ववस्था-
स्वहमहमिति साक्षात्साक्षिरूपेण बुद्धेः॥ **१३५**॥

*prakṛtivikṛtibhinnaḥ śuddhabodhasvabhāvaḥ*
*sadasadidamaśeṣaṁ bhāsayannirviśeṣaḥ |*
*vilasati paramātmā jāgradādiṣvavasthā-*
*svahamahamiti sākṣātsākṣirūpeṇa buddheḥ || **135**||*

नियमितमनसामुं त्वं स्वमात्मानमात्मन्
ययमहमिति साक्षाद्विद्धि बुद्धिप्रसादात्।
जनिमरणतरंगापारसंसारसिन्धुं
प्रतर भव कृतार्थो ब्रह्मरूपेण संस्थः॥ **१३६**॥

*niyamitamanasāmuṁ tvaṁ svamātmānamātman*
*yayamahamiti sākṣādviddhi buddhiprasādāt |*
*janimaraṇataraṅgāpārasaṁsārasindhuṁ*
*pratara bhava kṛtārtho brahmarūpeṇa saṁsthaḥ || **136**||*

अज्ञानात्मन्यहमिति मतिर्बन्ध एषोऽस्य पुंसः
प्राप्तोऽज्ञानाज्जननमरणक्लेशसंपातहेतुः।
येनैवायं वपुरिदमसत्सत्यमित्यात्मबुद्ध्या
पुष्यत्युक्षत्यवति विषयैस्तन्तुभिः कोशकृद्वत्॥ **१३७**॥

*atrānātmanyahamiti matirbandha eṣo'sya puṁsaḥ*
*prāpto'jñānājjananamaraṇakleśasampātahetuḥ |*
*yenaivāyaṁ vapuridamasatsatyamityātmabuddhyā*
*puṣyatyukṣatyavati viṣayaistantubhiḥ kośakṛdvat || **137**||*

अतस्मिंस्तद्बुद्धिः प्रभवति विमूढस्य तमसा
विवेकाभावाद्वै स्फुरति भुजगे रज्जुधिषणा।
ततोऽनर्थव्रातो निपतति समादातुरधिकः
ततो योऽसद्ग्राहः स हि भवति बन्धः शृणु सखे॥ **१३८**॥

*atasmiṁstadbuddhiḥ prabhavati vimūḍhasya tamasā*
*vivekābhāvādvai sphurati bhujage rajjudhiṣaṇā |*
*tato'narthavrāto nipatati samādāturadhikaḥ*
*tato yo'sadgrāhaḥ sa hi bhavati bandhaḥ śṛṇu sakhe || **138**||*

अखण्डनित्याद्वयबोधशक्त्या
स्फुरन्तमात्मानमनन्तवैभवम्।
समावृणोत्यावृतिशक्तिरेषा
तमोमयी राहुरिवार्कबिम्बम्॥ **१३९**॥

*akhaṇḍanityādvayabodhaśaktyā*
*sphurantamātmānamanantavaibhavam |*
*samāvṛṇotyāvṛtiśaktireṣā*
*tamomayī rāhurivārkabimbam || **139**||*

तिरोभूते स्वात्मन्यमलतरतेजोवति पुमान्

अनात्मानं मोहादहमिति शरीरं कलयति ।

ततः कामक्रोधप्रभृतिभिरमुं बन्धनगुणैः

परं विक्षेपाख्या रजस उरुशक्तिर्व्यथयति ॥ १४० ॥

*tirobhūte svātmanyamalataratejovati pumān*
*anātmānaṁ mohādahamiti śarīraṁ kalayati |*
*tataḥ kāmakrodhaprabhṛtibhiramuṁ bandhanaguṇaiḥ*
*paraṁ vikṣepākhyā rajasa uruśaktirvyathayati ||* ***140****||*

महामोहग्राहग्रसनगलितात्मावगमनो

धियो नानावस्थां स्वयमभिनयंस्तद्गुणतया ।

अपारे संसारे विषयविषपूरे जलनिधौ

निमज्योन्मज्यायं भ्रमति कुमतिः कुत्सितगतिः ॥ १४१ ॥

*mahāmohagrāhagrasanagalitātmāvagamano*
*dhiyo nānāvasthāṁ svayamabhinayaṁstadguṇatayā |*
*apāre saṁsāre viṣayaviṣapūre jalanidhau*
*nimajyonmajyāyaṁ bhramati kumatiḥ kutsitagatiḥ ||* ***141****||*

भानुप्रभासंजनिताभ्रपङ्क्तेिः

भानुं तिरोधाय विजृम्भते यथा ।

आत्मोदिताहंकृतिरात्मतत्त्वं

तथा तिरोधाय विजृम्भते स्वयम् ॥ १४२ ॥

*bhānuprabhāsañjanitābhrapaṅktiḥ*
*bhānuṁ tirodhāya vijṛmbhate yathā |*
*ātmoditāhaṅkṛtirātmatattvaṁ*
*tathā tirodhāya vijṛmbhate svayam ||* ***142****||*

कवलितदिननाथे दुर्दिने सान्द्रमेघैः
व्यथयति हिमझंझावायुरुग्रो यथैतान्।
अविरततमसात्मन्यावृते मूढबुद्धिं
क्षपयति बहुदुःखैस्तीव्रविक्षेपशक्तिः॥ **१४३**॥

*kavalitadinanāthe durdine sāndrameghaiḥ*
*vyathayati himajhañjhāvāyurugro yathaitān |*
*aviratatamasātmanyāvṛte mūḍhabuddhiṁ*
*kṣapayati bahuduḥkhaistīvravikṣepaśaktiḥ ||* ***143****||*

एताभ्यामेव शक्तिभ्यां बन्धः पुंसः समागतः।
याभ्यां विमोहितो देहं मत्वाऽत्मानं भ्रमत्ययम्॥ **१४४**॥

*etābhyāmeva śaktibhyāṁ bandhaḥ puṁsaḥ samāgataḥ |*
*yābhyāṁ vimohito dehaṁ*
*matvā'tmānaṁ bhramatyayam ||* ***144****||*

बीजं संसृतिभूमिजस्य तु तमो देहात्मधीरङ्कुरो
रागः पल्लवमम्बु कर्म तु वपुः स्कन्धोऽसवः शाखिकाः।
अग्राणीन्द्रियसंहतिश्च विषयाः पुष्पाणि दुःखं फलं
नानाकर्मसमुद्भवं बहुविधं भोक्तात्र जीवः खगः॥ **१४५**॥

*bījaṁ saṁsṛtibhūmijasya tu tamo dehātmadhīraṅkuro*
*rāgaḥ pallavamambu karma tu vapuḥ skandhoo'savaḥ śākhikāḥ |*
*agrāṇīndriyasaṁhatiśca viṣayāḥ puṣpāṇi duḥkhaṁ phalaṁ*
*nānākarmasamudbhavaṁ bahuvidhaṁ*
*bhoktātra jīvaḥ khagaḥ ||* ***145****||*

अज्ञानमूलोऽयमनात्मबन्धो
नैसर्गिकोऽनादिरनन्त ईरितः ।
जन्माप्ययव्याधिजरादिदुःख-
प्रवाहपातं जनयत्यमुष्य ॥ **१४६** ॥

*ajñānamūlo'yamanātmabandho*
*naisargiko'nādirananta īritaḥ |*
*janmāpyayavyādhijarādiduḥkha-*
*pravāhapātaṁ janayatyamuṣya ||* ***146****||*

नास्त्रैर्न शस्त्रैरनिलेन वन्हिना
छेत्तुं न शक्यो न च कर्मकोटिभिः ।
विवेकविज्ञानमहासिना विना
धातुः प्रसादेन शितेन मञ्जुना ॥ **१४७** ॥

*nāstrairna śastrairanilena vanhinā*
*chettuṁ na śakyo na ca karmakoṭibhiḥ |*
*vivekavijñānamahāsinā vinā*
*dhātuḥ prasādena śitena mañjunā ||* ***147****||*

श्रुतिप्रमाणैकमतेः स्वधर्म

निष्ठा तयैवात्मविशुद्धिरस्य ।

विशुद्धबुद्धेः परमात्मवेदनं

तेनैव संसारसमूलनाशः ॥ **१४८** ॥

*śrutipramāṇaikamateḥ svadharma*
*niṣṭhā tayaivātmaviśuddhirasya /*
*viśuddhabuddheḥ paramātmavedanaṁ*
*tenaiva saṁsārasamūlanāśaḥ //* ***148****//*

कोशैरन्नमयाद्यैः पञ्चभिरात्मा न संवृतो भाति ।

निजशक्तिसमुत्पन्नैः शैवालपटलैरिवाम्बु वापीस्थम् ॥ **१४९** ॥

*kośairannamayādyaiḥ pañcabhirātmā na saṁvṛto bhāti /*
*nijaśaktisamutpannaiḥ śaivālapaṭalairivāmbu vāpīstham //* ***149****//*

तच्छैवालापनये सम्यकखे सलिलं प्रतीयते शुद्धम् ।

तृष्णासन्तापहरं सद्यः सौख्यप्रदं परं पुंसः ॥ **१५०** ॥

*tacchaivālāpanaye samyak salilaṁ pratīyate śuddham /*
*tṛṣṇāsantāpaharaṁ sadyaḥ*
*saukhyapradaṁ paraṁ puṁsaḥ //* ***150****//*

पञ्चानामपि कोशानामपवादे विभात्ययं शुद्धः ।

नित्यानन्दैकरसः प्रत्यग्रूपः परः स्वयंज्योतिः ॥ **१५१** ॥

*pañcānāmapi kośānāmapavāde vibhātyayaṁ śuddhaḥ /*
*nityānandaikarasaḥ pratyagrūpaḥ paraḥ svayañjyotiḥ //* ***151****//*

आत्मानात्मविवेकः कर्तव्यो बन्धमुक्तये विदुषा ।
तेनैवानन्दी भवति स्वं विज्ञाय सच्चिदानन्दम् ॥ १५२ ॥

*ātmānātmavivekaḥ kartavyo bandhamuktaye viduṣā |*
*tenaivānandī bhavati svaṁ vijñāya saccidānandam ||* ***152****||*

मुञ्जादिषीकामिव दृश्यवर्गात्
प्रत्यञ्चमात्मानमसङ्गमक्रियम् ।
विविच्य तत्र प्रविलाप्य सर्वं
तदात्मना तिष्ठति यः स मुक्तः ॥ १५३ ॥

*muñjādiṣīkāmiva dṛśyavargāt*
*pratyañcamātmānamasaṅgamakriyam |*
*vivicya tatra pravilāpya sarvaṁ*
*tadātmanā tiṣṭhati yaḥ sa muktaḥ ||* ***153****||*

देहोऽयमन्नभवनोऽन्नमयस्तु कोशः
चान्नेन जीवति विनश्यति तद्विहीनः ।
त्वक्चर्ममांसरुधिरास्थिपुरीषराशिः
नायं स्वयं भवितुमर्हति नित्यशुद्धः ॥ १५४ ॥

*deho'yamannabhavano'nnamayastu kośaḥ*
*cānnena jīvati vinaśyati tadvihīnaḥ |*
*tvakcarmamāṁsarudhirāsthipurīṣarāśiḥ*
*nāyaṁ svayaṁ bhavitumarhati nityaśuddhaḥ ||* ***154****||*

पूर्वं जनेरधिमृतेरपि नायमस्ति

जातक्षणः क्षणगुणोऽनियतस्वभावः।

नैको जडश्च घटवत्परिदृश्यमानः

स्वात्मा कथं भवति भावविकारवेत्ता ॥ **१५५** ॥

*pūrvaṁ janeradhimṛterapi nāyamasti*
*jātakṣaṇaḥ kṣaṇaguṇo'niyatasvabhāvaḥ /*
*naiko jaḍaśca ghaṭavatparidṛśyamānaḥ*
*svātmā kathaṁ bhavati bhāvavikāravettā // **155**//*

पाणिपादादिमान्देहो नात्मा व्यङ्गेऽपि जीवनात्।

तत्तच्छक्तेरनाशाच्च न नियम्यो नियामकः ॥ **१५६** ॥

*pāṇipādādimāndeho nātmā vyaṅge'pi jīvanāt /*
*tattacchakteranāśācca na niyamyo niyāmakaḥ // **156**//*

देहतद्धर्मतत्कर्मतदवस्थादिसाक्षिणः।

सत एव स्वतःसिद्धं तद्वैलक्षण्यमात्मनः ॥ **१५७** ॥

*dehataddharmatatkarmatadavasthādisākṣiṇaḥ /*
*sata eva svataḥsiddhaṁ tadvailakṣaṇyamātmanaḥ // **157**//*

शल्यराशिर्मांसलिप्तो मलपूर्णोऽतिकश्मलः।

कथं भवेदयं वेत्ता स्वयमेतद्विलक्षणः ॥ **१५८** ॥

*śalyarāśirmāṁsalipto malapūrṇo'tikaśmalaḥ /*
*kathaṁ bhavedayaṁ vettā svayametadvilakṣaṇaḥ // **158**//*

त्वङ्खेमांसमेदोऽस्थिपुरीषराशा-वहंमतिं मूढजनः करोति ।

विलक्षणं वेत्ति विचारशीलो निजस्वरूपं परमार्थ भूतम् ॥ **१५९** ॥

*tvaṅmāṁsamedo'sthipurīṣarāśā-*
*vahammatiṁ mūḍhajanaḥ karoti |*
*vilakṣaṇaṁ vetti vicāraśīlo*
*nijasvarūpaṁ paramārtha bhūtam || **159**||*

देहोऽहमित्येव जडस्य बुद्धिः

देहे च जीवे विदुषस्त्वहंधीः ।

विवेकविज्ञानवतो महात्मनो

ब्रह्माहमित्येव मतिः सदात्मनि ॥ **१६०** ॥

*deho'hamityeva jaḍasya buddhiḥ*
*dehe ca jīve viduṣastvahandhīḥ |*
*vivekavijñānavato mahātmano*
*brahmāhamityeva matiḥ sadātmani || **160**||*

अत्रात्मबुद्धिं त्यज मूढबुद्धे

त्वङ्खेमांसमेदोऽस्थिपुरीषराशौ ।

सर्वात्मनि ब्रह्मणि निर्विकल्पे

कुरुष्व शांति परमां भजस्व ॥ **१६१** ॥

*atrātmabuddhiṁ tyaja mūḍhabuddhe*
*tvaṅmāṁsamedo'sthipurīṣarāśau |*
*sarvātmani brahmaṇi nirvikalpe*
*kuruṣva śānti paramāṁ bhajasva || **161**||*

देहेन्द्रियादावसति भ्रमोदितां विद्वानहंतां न जहाति यावत्।
तावन्न तस्यास्ति विमुक्तिवार्ता-प्यस्त्वेष वेदान्तनयान्तदर्शी ॥ **१६२** ॥

*dehendriyādāvasati bhramoditāṁ*
*vidvānahantāṁ na jahāti yāvat |*
*tāvanna tasyāsti vimuktivārtā-*
*pyastveṣa vedāntanayāntadarśī || **162**||*

छायाशरीरे प्रतिबिम्बगात्रे
यत्स्वप्नदेहे हृदि कल्पिताङ्गे ।
यथात्मबुद्धिस्तव नास्ति काचि-
ज्जीवच्छरीरे च तथैव माऽस्तु ॥ **१६३** ॥

*chāyāśarīre pratibimbagātre*
*yatsvapnadehe hṛdi kalpitāṅge |*
*yathātmabuddhistava nāsti kāci-*
*jjīvaccharīre ca tathaiva mā'stu || **163**||*

देहात्मधीरेव नृणामसद्धियां
जन्मादिदुःखप्रभवस्य बीजम्।
यतस्ततस्त्वं जहि तां प्रयत्नात्
त्यक्ते तु चित्ते न पुनर्भवाशा ॥ **१६४** ॥

*dehātmadhīreva nṛṇāmasaddhiyāṁ*
*janmādiduḥkhaprabhavasya bījam |*
*yatastatastvaṁ jahi tāṁ prayatnāt*
*tyakte tu citte na punarbhavāśā || **164**||*

कर्मेन्द्रियैः पञ्चभिरञ्चितोऽयं प्राणो भवेत्प्राणमयस्तु कोशः ॥

येनात्मवानन्नमयोऽनुपूर्णः प्रवर्ततेऽसौ सकलक्रियासु ॥ **१६५** ॥

*karmendriyaiḥ pañcabhirañcito'yaṁ*
*prāṇo bhavetprāṇamayastu kośaḥ //*
*yenātmavānannamayo'nupūrṇaḥ*
*pravartate'sau sakalakriyāsu //* **165**//

नैवात्मापि प्राणमयो वायुविकारो

गन्ताऽऽगन्ता वायुवदन्तर्बहिरेषः ।

यस्मात्किञ्चित्क्वापि न वेत्तीष्टमनिष्टं

स्वं वान्यं वा किञ्चन नित्यं परतन्त्रः ॥ **१६६** ॥

*naivātmāpi prāṇamayo vāyuvikāro*
*gantā''gantā vāyuvadantarbahireṣaḥ /*
*yasmātkiñcitkvāpi na vettīṣṭamaniṣṭaṁ*
*svaṁ vānyaṁ vā kiñcana nityaṁ paratantraḥ //* **166**//

ज्ञानेन्द्रियाणि च मनश्च मनोमयः स्यात्

कोशो ममाहमिति वस्तुविकल्पहेतुः ।

संज्ञादिभेदकलनाकलितो बलीयां-

स्तत्पूर्वकोशमभिपूर्य विजृम्भते यः ॥ **१६७** ॥

*jñānendriyāṇi ca manaśca manomayaḥ syāt*
*kośo mamāhamiti vastuvikalpahetuḥ /*
*sañjñādibhedakalanākalito balīyāṁ-*
*statpūrvakośamabhipūrya vijṛmbhate yaḥ //* **167**//

पञ्चेन्द्रियैः पञ्चभिरेव होतृभिः प्रचीयमानो विषयाज्यधारया ।
जाज्वल्यमानो बहुवासनेन्धनैः मनोमयाग्निर्दहति प्रपञ्चम् ॥ १६८ ॥

*pañcendriyaiḥ pañcabhireva hotṛbhiḥ*
*pracīyamāno viṣayājyadhārayā |*
*jājvalyamāno bahuvāsanendhanaiḥ*
*manomayāgnirdahati prapañcam ||* ***168****||*

न ह्यस्त्यविद्या मनसोऽतिरिक्ता
मनो ह्यविद्या भवबन्धहेतुः ।
तस्मिन्विनष्टे सकलं विनष्टं
विजृम्भितेऽस्मिन्सकलं विजृम्भते ॥ १६९ ॥

*na hyastyavidyā manaso'tiriktā*
*mano hyavidyā bhavabandhahetuḥ |*
*tasminvinaṣṭe sakalaṁ vinaṣṭaṁ*
*vijṛmbhite'sminsakalaṁ vijṛmbhate ||* ***169****||*

स्वप्नेऽर्थशून्ये सृजति स्वशक्त्या
भोक्त्रादिविश्वं मन एव सर्वम् ।
तथैव जाग्रत्यपि नो विशेषः
तत्सर्वमेतन्मनसो विजृम्भणम् ॥ १७० ॥

*svapne'rthaśūnye sṛjati svaśaktyā*
*bhoktrādiviśvaṁ mana eva sarvam |*
*tathaiva jāgratyapi no viśeṣaḥ*
*tatsarvametanmanaso vijṛmbhaṇam ||* ***170****||*

सुषुप्तिकाले मनसि प्रलीने

नैवास्ति किञ्चित्सकलप्रसिद्धेः ।

अतो मनःकल्पित एव पुंसः

संसार एतस्य न वस्तुतोऽस्ति ॥ १७१ ॥

*suṣuptikāle manasi pralīne*
*naivāsti kiñcitsakalaprasiddheḥ /*
*ato manaḥkalpita eva puṁsaḥ*
*saṁsāra etasya na vastuto'sti // **171**//*

वायुनाऽऽनीयते मेघः पुनस्तेनैव नीयते ।

मनसा कल्प्यते बन्धो मोक्षस्तेनैव कल्प्यते ॥ १७२ ॥

*vāyunā''nīyate meghaḥ punastenaiva nīyate /*
*manasā kalpyate bandho mokṣastenaiva kalpyate // **172**//*

देहादिसर्वविषये परिकल्प्य रागं

बध्नाति तेन पुरुषं पशुवद्गुणेन ।

वैरस्यमत्र विषवत् सुवुधाय पश्चादखे

एनं विमोचयति तन्मन एव बन्धात् ॥ १७३ ॥

*dehādisarvaviṣaye parikalpya rāgaṁ*
*badhnāti tena puruṣaṁ paśuvadguṇena /*
*vairasyamatra viṣavat suvudhāya paścād*
*enaṁ vimocayati tanmana eva bandhāt // **173**//*

तस्मान्मनः कारणमस्य जन्तोः

बन्धस्य मोक्षस्य च वा विधाने ।

बन्धस्य हेतुर्मलिनं रजोगुणैः

मोक्षस्य शुद्धं विरजस्तमस्कम् ॥ १७४ ॥

*tasmānmanaḥ kāraṇamasya jantoḥ*
*bandhasya mokṣasya ca vā vidhāne |*
*bandhasya heturmalinaṁ rajoguṇaiḥ*
*mokṣasya śuddhaṁ virajastamaskam || **174**||*

विवेकवैराग्यगुणातिरेका-

च्छुद्धत्वमासाद्य मनो विमुक्त्यै ।

भवत्यतो बुद्धिमतो मुमुक्षो-

स्ताभ्यां दृढाभ्यां भवितव्यमग्रे ॥ १७५ ॥

*vivekavairāgyaguṇātirekā-*
*cchuddhatvamāsādya mano vimuktyai |*
*bhavatyato buddhimato mumukṣo-*
*stābhyāṁ dṛḍhābhyāṁ bhavitavyamagre || **175**||*

मनो नाम महाव्याघ्रो विषयारण्यभूमिषु ।

चरत्यत्र न गच्छन्तु साधवो ये मुमुक्षवः ॥ १७६ ॥

*mano nāma mahāvyāghro viṣayāraṇyabhūmiṣu |*
*caratyatra na gacchantu sādhavo ye mumukṣavaḥ || **176**||*

मनः प्रसूते विषयानशेषान्

स्थूलात्मना सूक्ष्मतया च भोक्तुः।

शरीरवर्णाश्रमजातिभेदान्

गुणक्रियाहेतुफलानि नित्यम्॥ १७७॥

*manaḥ prasūte viṣayānaśeṣān*
*sthūlātmanā sūkṣmatayā ca bhoktuḥ |*
*śarīravarṇāśramajātibhedān*
*guṇakriyāhetuphalāni nityam || **177**||*

असंगचिद्रूपममुं विमोह्य देहेन्द्रियप्राणगुणैर्निबद्ध्य।

अहंममेति भ्रमयत्यजस्रं मनः स्वकृत्येषु फलोपभुक्तिषु॥ १७८॥

*asaṅgacidrūpamamuṁ vimohya*
*dehendriyaprāṇaguṇairnibaddhya |*
*ahammameti bhramayatyajasraṁ*
*manaḥ svakṛtyeṣu phalopabhuktiṣu || **178**||*

अध्यासदोषात्पुरुषस्य संसृतिः

अध्यासबन्धस्त्वमुनैव कल्पितः।

रजस्तमोदोषवतोऽविवेकिनो

जन्मादिदुःखस्य निदानमेतत्॥ १७९॥

*adhyāsadoṣātpuruṣasya saṁsṛtiḥ*
*adhyāsabandhastvamunaiva kalpitaḥ |*
*rajastamodoṣavato'vivekino*
*janmādiduḥkhasya nidānametat || **179**||*

अतः प्राहुर्मनोऽविद्यां पण्डितास्तत्त्वदर्शिनः ।
येनैव भ्राम्यते विश्वं वायुनेवाभ्रमण्डलम् ॥ १८० ॥

*ataḥ prāhurmano'vidyāṁ paṇḍitāstattvadarśinaḥ /*
*yenaiva bhrāmyate viśvaṁ vāyunevābhramaṇḍalam //* ***180****//*

तन्मनःशोधनं कार्यं प्रयत्नेन मुमुक्षुणा ।
विशुद्धे सति चैतस्मिन्मुक्तिः करफलायते ॥ १८१ ॥

*tanmanaḥśodhanaṁ kāryaṁ prayatnena mumukṣuṇā /*
*viśuddhe sati caitasminmuktiḥ karaphalāyate //* ***181****//*

मोक्षैकसक्त्या विषयेषु रागं
निर्मूल्य संन्यस्य च सर्वकर्म ।
सच्छ्रद्धया यः श्रवणादिनिष्ठो
रजःस्वभावं स धुनोति बुद्धेः ॥ १८२ ॥

*mokṣaikasaktyā viṣayeṣu rāgaṁ*
*nirmūlya sannyasya ca sarvakarma /*
*sacchraddhayā yaḥ śravaṇādiniṣṭho*
*rajaḥsvabhāvaṁ sa dhunoti buddheḥ //* ***182****//*

मनोमयो नापि भवेत्परात्मा
ह्याद्यन्तवत्त्वात्परिणामिभावात् ।
दुःखात्मकत्वाद्विषयत्वहेतोः
द्रष्टा हि दृश्यात्मतया न दृष्टः ॥ १८३ ॥

*manomayo nāpi bhavetparātmā*
*hyādyantavattvātpariṇāmibhāvāt* /
*duḥkhātmakatvādviṣayatvahetoḥ*
*draṣṭā hi dṛśyātmatayā na dṛṣṭaḥ* // ***183***//

बुद्धिर्बुद्धीन्द्रियैः सार्धं सवृत्तिः कर्तृलक्षणः।
विज्ञानमयकोशः स्यात्पुंसः संसारकारणम्॥ **१८४** ॥

*buddhirbuddhīndriyaiḥ sārdhaṁ savṛttiḥ kartṛlakṣaṇaḥ* /
*vijñānamayakośaḥ syātpuṁsaḥ saṁsārakāraṇam* // ***184***//

अनुव्रजच्चित्प्रतिबिम्बशक्तिः
विज्ञानसंज्ञः प्रकृतेर्विकारः।
ज्ञानक्रियावानहमित्यजस्रं
देहेन्द्रियादिष्वभिमन्यते भृशम्॥ **१८५** ॥

*anuvrajaccitpratibimbaśaktiḥ*
*vijñānasañjñaḥ prakṛtervikāraḥ* /
*jñānakriyāvānahamityajasraṁ*
*dehendriyādiṣvabhimanyate bhṛśam* // ***185***//

अनादिकालोऽयमहंस्वभावो जीवः समस्तव्यवहारवोढा।
करोति कर्माण्यपि पूर्ववासनः पुण्यान्यपुण्यानि च तत्फलानि॥ **१८६** ॥

*anādikālo'yamahaṁsvabhāvo jīvaḥ samastavyavahāravoḍhā* /
*karoti karmāṇyapi pūrvavāsanaḥ*
*puṇyānyapuṇyāni ca tatphalāni* // ***186***//

भुङ्क्ते विचित्रास्वपि योनिषु व्रज-न्नायाति निर्यात्यध ऊर्ध्वमेषः।

अस्यैव विज्ञानमयस्य जाग्रत्-स्वप्नाद्यवस्थाः सुखदुःखभोगः॥ **१८७** ॥

*bhuṅkte vicitrāsvapi yoniṣu vraja-*
*nnāyāti niryātyadha ūrdhvameṣaḥ |*
*asyaiva vijñānamayasya jāgrat-*
*svapnādyavasthāḥ sukhaduḥkhabhogaḥ ||* ***187***//

देहादिनिष्ठाश्रमधर्मकर्म- गुणाभिमानः सततं ममेति।

विज्ञानकोशोऽयमतिप्रकाशः प्रकृष्टसान्निध्यवशात्परात्मनः।

अतो भवत्येष उपाधिरस्य यदात्मधीः संसरति भ्रमेण॥ **१८८** ॥

*dehādiniṣṭhāśramadharmakarma-guṇābhimānaḥ satataṁ mameti |*
*vijñānakośo'yamatiprakāśaḥ prakṛṣṭasānnidhyavaśātparātmanaḥ |*
*ato bhavatyeṣa upādhirasya*
*yadātmadhīḥ saṁsarati bhrameṇa || 188||*

योऽयं विज्ञानमयः प्राणेषु हृदि स्फुरत्ययं ज्योतिः।

कूटस्थः सद्रात्मा कर्ता भोक्ता भवत्युपाधिस्थः॥ **१८९** ॥

*yo'yaṁ vijñānamayaḥ prāṇeṣu hṛdi sphuratyayaṁ jyotiḥ |*
*kūṭasthaḥ sannātmā kartā bhoktā bhavatyupādhisthaḥ ||* ***189***//

स्वयं परिच्छेदमुपेत्य बुद्धेः

तादात्म्यदोषेण परं मृषात्मनः।

सर्वात्मकः सद्रपि वीक्षते स्वयं

स्वतः पृथकखेत्वेन मृदो घटानिव॥ **१९०** ॥

*svayaṁ paricchedamupetya buddheḥ*
*tādātmyadoṣeṇa paraṁ mṛṣātmanaḥ |*
*sarvātmakaḥ sannapi vīkṣate svayaṁ*
*svataḥ pṛthaktvena mṛdo ghaṭāniva || **190**||*

उपाधिसम्बन्धवशात्परात्मा
ह्युपाधिधर्माननुभाति तद्गुणः ।
अयोविकारानविकारिवह्निवत्
सदैकरूपोऽपि परः स्वभावात् ॥ १९१ ॥

*upādhisambandhavaśātparātmā*
*hyupādhidharmānanubhāti tadguṇaḥ |*
*ayovikārānavikārivahnivat*
*sadaikarūpo'pi paraḥ svabhāvāt || **191**||*

शिष्य उवाच ।
भ्रमेणाप्यन्यथा वाऽस्तु जीवभावः परात्मनः ।
तदुपाधेरनादित्वान्नानादेर्नाश इष्यते ॥ १९२ ॥

*śiṣya uvāca |*
*bhrameṇāpyanyathā vā'stu jīvabhāvaḥ parātmanaḥ |*
*tadupādheranāditvānnānādernāśa iṣyate || **192**||*

अतोऽस्य जीवभावोऽपि नित्या भवति संसृतिः ।
न निवर्तेत तन्मोक्षः कथं मे श्रीगुरो वद ॥ **193** ॥

*ato'sya jīvabhāvo'pi nityā bhavati saṁsṛtiḥ |*
*na nivarteta tanmokṣaḥ kathaṁ me śrīguro vada || **193**||*

श्रीगुरुरुवाच ।

सम्यकखेपृष्टं त्वया विद्वन्सावधानेन तच्छृणु ।

प्रामाणिकी न भवति भ्रान्त्या मोहितकल्पना ॥ **१९४** ॥

*śrīgururuvāca |*
*samyakpṛṣṭaṁ tvayā vidvansāvadhānena tacchṛṇu |*
*prāmāṇikī na bhavati bhrāntyā mohitakalpanā || **194**||*

भ्रान्तिं विना त्वसङ्गस्य निष्क्रियस्य निराकृतेः ।

न घटेतार्थसम्बन्धो नभसो नीलतादिवत् ॥ **१९५** ॥

*bhrāntiṁ vinā tvasaṅgasya niṣkriyasya nirākṛteḥ |*
*na ghaṭetārthasambandho nabhaso nīlatādivat || **195**||*

स्वस्य द्रष्टुर्निर्गुणस्याक्रियस्य प्रत्यग्बोधानन्दरूपस्य बुद्धेः ।

भ्रान्त्या प्राप्तो जीवभावो न सत्यो मोहापाये नास्त्यवस्तुस्वभावात् ॥ **196** ॥

*svasya draṣṭurnirguṇasyākriyasya*
*pratyagbodhānandarūpasya buddheḥ |*
*bhrāntyā prāpto jīvabhāvo na satyo*
*mohāpāye nāstyavastusvabhāvāt || **196**||*

यावद्भ्रान्तिस्तावदेवास्य सत्ता

मिथ्याज्ञानोज्जृम्भितस्य प्रमादात् ।

रज्ज्वां सर्पो भ्रान्तिकालीन एव

भ्रान्तेर्नाशे नैव सर्पोऽपि तद्वत् ॥ **१९७** ॥

*yāvadbhrāntistāvadevāsya sattā*
*mithyājñānojjṛmbhitasya pramādāt |*
*rajjvāṁ sarpo bhrāntikālīna eva*
*bhrānternāśe naiva sarpo'pi tadvat || 197||*

अनादित्वमविद्यायाः कार्यस्यापि तथेष्यते।
उत्पद्रायां तु विद्यायामाविद्यकमनाद्यपि॥ १९८॥

*anāditvamavidyāyāḥ kāryasyāpi tatheṣyate |*
*utpannāyāṁ tu vidyāyāmāvidyakamanādyapi || 198||*

प्रबोधे स्वप्नवत्सर्वं सहमूलं विनश्यति।
अनाद्यपीदं नो नित्यं प्रागभाव इव स्फुटम्॥ १९९॥

*prabodhe svapnavatsarvaṁ sahamūlaṁ vinaśyati |*
*anādyapīdaṁ no nityaṁ prāgabhāva iva sphuṭam || 199||*

अनादेरपि विध्वंसः प्रागभावस्य वीक्षितः।
यद्बुद्ध्युपाधिसम्बम्धात्परिकल्पितमात्मनि॥ २००॥

*anāderapi vidhvaṁsaḥ prāgabhāvasya vīkṣitaḥ |*
*yadbuddhyupādhisambamdhātparikalpitamātmani || 200||*

जीवत्वं न ततोऽन्यस्तु स्वरूपेण विलक्षणः।
सम्बन्धस्त्वात्मनो बुद्ध्या मिथ्याज्ञानपुरःसरः॥ २०१॥

*jīvatvaṁ na tato'nyastu svarūpeṇa vilakṣaṇaḥ |*
*sambandhastvātmano buddhyā mithyājñānapuraḥsaraḥ || 201||*

जीवत्वं न ततोऽन्यस्तु स्वरूपेण विलक्षणः।

सम्बन्धस्त्वात्मनो बुद्ध्या मिथ्याज्ञानपुरःसरः॥ **२०१** ॥

*jīvatvaṁ na tato'nyastu svarūpeṇa vilakṣaṇaḥ |*
*sambandhastvātmano buddhyā mithyājñānapuraḥsaraḥ || 201||*

विनिवृत्तिर्भवेत्तस्य सम्यग्ज्ञानेन नान्यथा।

ब्रह्मात्मैकत्वविज्ञानं सम्यग्ज्ञानं श्रुतेर्मतम्॥ **२०२** ॥

*vinivṛttirbhavettasya samyagjñānena nānyathā |*
*brahmātmaikatvavijñānaṁ samyagjñānaṁ śrutermatam || 202||*

तदात्मानात्मनोः सम्यग्विवेकेनैव सिध्यति।

ततो विवेकः कर्तव्यः प्रत्यगात्मसदात्मनोः॥ **२०३** ॥

*tadātmānātmanoḥ samyagvivekenaiva sidhyati |*
*tato vivekaḥ kartavyaḥ pratyagātmasadātmanoḥ || 203||*

जलं पंकवदत्यन्तं पंकापाये जलं स्फुटम्।

यथा भाति तथात्मापि दोषाभावे स्फुटप्रभः॥ **२०४** ॥

*jalaṁ paṅkavadatyantaṁ paṅkāpāye jalaṁ sphuṭam |*
*yathā bhāti tathātmāpi doṣābhāve sphuṭaprabhaḥ || 204||*

असद्विवृत्तौ तु सदात्मना स्फुटं प्रतीतिरेतस्य भवेत्प्रतीचः।

ततो निरासः करणीय एव

सदात्मनः साध्वहमादिवस्तुनः॥ **२०५** ॥

*asannivṛttau tu sadātmanā sphuṭaṁ*
*pratītiretasya bhavetpratīcaḥ /*
*tato nirāsaḥ karaṇīya eva*
*sadātmanaḥ sādhvahamādivastunaḥ // 205//*

अतो नायं परात्मा स्याद्विज्ञानमयशब्दभाक्खे ।
विकारित्वाज्जडत्वाच्च परिच्छिन्नत्वहेतुतः ।
दृश्यत्वाद्व्यभिचारित्वान्नानित्यो नित्य इष्यते ॥ २०६ ॥

*ato nāyaṁ parātmā syādvijñānamayaśabdabhāk /*
*vikāritvājjaḍatvācca paricchinnatvahetutaḥ /*
*dṛśyatvādvyabhicāritvānnānityo nitya iṣyate // 206//*

आनन्दप्रतिबिम्बचुम्बिततनुर्वृत्तिस्तमोजृम्भिता
स्यादानन्दमयः प्रियादिगुणकः स्वेष्टार्थलाभोदयः ।
पुण्यस्यानुभवे विभाति कृतिनामानन्दरूपः स्वयं
सर्वो नन्दति यत्र साधु तनुभृन्मात्रः प्रयत्नं विना ॥ २०७ ॥

*ānandapratibimbacumbitatanurvṛttistamojṛmbhitā*
*syādānandamayaḥ priyādiguṇakaḥ sveṣṭārthalābhodayaḥ /*
*puṇyasyānubhave vibhāti kṛtināmānandarūpaḥ svayaṁ*
*sarvo nandati yatra sādhu tanubhṛnmātraḥ*
*prayatnaṁ vinā // 207//*

आनन्दमयकोशस्य सुषुप्तौ स्फूर्तिरुत्कटा ।
स्वप्नजागरयोरीषदिष्टसंदर्शनादिना ॥ २०८ ॥

*ānandamayakośasya suṣuptau sphūrtirutkaṭā |*
*svapnajāgarayorīṣadiṣṭasandarśanādinā || **208**||*

नैवायमानन्दमयः परात्मा
सोपाधिकत्वात्प्रकृतेर्विकारात् ।
कार्यत्वहेतोः सुकृतक्रियाया
विकारसंघातसमाहितत्वात् ॥ **२०९** ॥

*naivāyamānandamayaḥ parātmā*
*sopādhikatvātprakṛtervikārāt |*
*kāryatvahetoḥ sukṛtakriyāyā*
*vikārasaṅghātasamāhitatvāt || **209**||*

पञ्चानामपि कोशानां निषेधे युक्तितः श्रुतेः ।
तन्निषेधावधि साक्षी बोधरूपोऽवशिष्यते ॥ **२१०** ॥

*pañcānāmapi kośānāṁ niṣedhe yuktitaḥ śruteḥ |*
*tanniṣedhāvadhi sākṣī bodharūpo'vaśiṣyate || **210**||*

योऽयमात्मा स्वयंज्योतिः पञ्चकोशविलक्षणः ।
अवस्थात्रयसाक्षी सन्निर्विकारो निरञ्जनः ।
सदानन्दः स विज्ञेयः स्वात्मत्वेन विपश्चिता ॥ **२११** ॥

*yo'yamātmā svayañjyotiḥ pañcakośavilakṣaṇaḥ |*
*avasthātrayasākṣī sannirvikāro nirañjanaḥ |*
*sadānandaḥ sa vijñeyaḥ svātmatvena vipaścitā || **211**||*

शिष्य उवाच ।

मिथ्यात्वेन निषिद्धेषु कोशेष्वेतेषु पञ्चसु ।

सर्वाभावं विना किञ्चिन्न पश्याम्यत्र हे गुरो ।

विज्ञेयं किमु वस्त्वस्ति स्वात्मनाऽऽत्मविपश्चिता ॥ **२१२** ॥

*śiṣya uvāca /*
*mithyātvena niṣiddheṣu kośeṣveteṣu pañcasu /*
*sarvābhāvaṁ vinā kiñcinna paśyāmyatra he guro /*
*vijñeyaṁ kimu vastvasti svātmanā''tmavipaścitā // **212**//*

श्रीगुरुरुवाच ।

सत्यमुक्तं त्वया विद्वन्निपुणोऽसि विचारणे ।

अहमादिविकारास्ते तदभावोऽयमप्यनु ॥ **२१३** ॥

*śrīgururuvāca /*
*satyamuktaṁ tvayā vidvannipuṇo'si vicāraṇe /*
*ahamādivikārāste tadabhāvo'yamapyanu // **213**//*

सर्वे येनानुभूयन्ते यः स्वयं नानुभूयते ।

तमात्मानं वेदितारं विद्धि बुद्ध्या सुसूक्ष्मया ॥ **२१४** ॥

*sarve yenānubhūyante yaḥ svayaṁ nānubhūyate /*
*tamātmānaṁ veditāraṁ viddhi buddhyā susūkṣmayā // **214**//*

तत्साक्षिकं भवेत्तत्तद्यद्यद्येनानुभूयते ।

कस्याप्यननुभूतार्थे साक्षित्वं नोपयुज्यते ॥ **२१५** ॥

*tatsākṣikaṁ bhavettattadyadyadyenānubhūyate /*
*kasyāpyananubhūtārthe sākṣitvaṁ nopayujyate // **215**//*

असौ स्वसाक्षिको भावो यतः स्वेनानुभूयते ।
अतः परं स्वयं साक्षात्प्रत्यगात्मा न चेतरः ॥ **२१६** ॥

*asau svasākṣiko bhāvo yataḥ svenānubhūyate /*
*ataḥ paraṁ svayaṁ sākṣātpratyagātmā na cetaraḥ // **216**//*

जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरं योऽसौ समुज्जृम्भते
प्रत्यग्रूपतया सदाहमहमित्यन्तः स्फुरन्नैकधा ।
नानाकारविकारभागिन इमान् पश्यन्नहंधीमुखान्
नित्यानन्दचिदात्मना स्फुरति तं विद्धि स्वमेतं हृदि ॥ **२१७** ॥

*jāgratsvapnasuṣuptiṣu sphuṭataraṁ yo'sau samujjṛmbhate*
*pratyagrūpatayā sadāhamahamityantaḥ sphurannaikadhā /*
*nānākāravikārabhāgina imān paśyannahandhīmukhān*
*nityānandacidātmanā sphurati taṁ*
*viddhi svametaṁ hṛdi // **217**//*

घटोदके बिम्बितमर्कबिम्ब- मालोक्य मूढो रविमेव मन्यते ।
तथा चिदाभासमुपाधिसंस्थं भ्रान्त्याहमित्येव जडोऽभिमन्यते ॥ **२१८** ॥

*ghaṭodake bimbitamarkabimba-*
*mālokya mūḍho ravimeva manyate /*
*tathā cidābhāsamupādhisaṁsthaṁ*
*bhrāntyāhamityeva jaḍo'bhimanyate // **218**//*

घटं जलं तद्गतमर्कबिम्बं

विहाय सर्वं विनिरीक्ष्यतेऽर्कः।

तटस्थ एतत्त्रितयावभासकः

स्वयंप्रकाशो विदुषा यथा तथा॥ २१९॥

*ghaṭaṁ jalaṁ tadgatamarkabimbaṁ*
*vihāya sarvaṁ vinirīkṣyate'rkaḥ /*
*taṭastha etattritayāvabhāsakaḥ*
*svayamprakāśo viduṣā yathā tathā // 219//*

देहं धियं चित्प्रतिबिम्बमेवं

विसृज्य बुद्धौ निहितं गुहायाम्।

द्रष्टारमात्मानमखण्डबोधं

सर्वप्रकाशं सदसद्विलक्षणम्॥ २२०॥

*dehaṁ dhiyaṁ citpratibimbamevaṁ*
*visṛjya buddhau nihitaṁ guhāyām /*
*draṣṭāramātmānamakhaṇḍabodhaṁ*
*sarvaprakāśaṁ sadasadvilakṣaṇam // 220//*

नित्यं विभुं सर्वगतं सुसूक्ष्मं अन्तर्बहिःशून्यमनन्यमात्मनः।

विज्ञाय सम्यङ्खेनिजरूपमेतत् पुमान् विपाप्मा विरजो विमृत्युः॥ २२१॥

*nityaṁ vibhuṁ sarvagataṁ susūkṣmaṁ*
*antarbahiḥśūnyamananyamātmanaḥ /*
*vijñāya samyaṅnijarūpametat*
*pumān vipāpmā virajo vimṛtyuḥ // 221//*

विशोक आनन्दघनो विपश्चित्

स्वयं कुतश्चिद्र बिभेति कश्चित्।

नान्योऽस्ति पन्था भवबन्धमुक्तेः

विना स्वतत्त्वावगमं मुमुक्षोः॥ २२२॥

*viśoka ānandaghano vipaścit*
*svayaṁ kutaścinna bibheti kaścit |*
*nānyo'sti panthā bhavabandhamukteḥ*
*vinā svatattvāvagamaṁ mumukṣoḥ || **222**||*

ब्रह्माभिन्नत्वविज्ञानं भवमोक्षस्य कारणम्।

येनाद्वितीयमानन्दं ब्रह्म सम्पद्यते बुधैः॥ २२३॥

*brahmābhinnatvavijñānaṁ bhavamokṣasya kāraṇam |*
*yenādvitīyamānandaṁ brahma sampadyate budhaiḥ || **223**||*

ब्रह्मभूतस्तु संसृत्यै विद्वान्नावर्तते पुनः।

विज्ञातव्यमतः सम्यग्ब्रह्माभिन्नत्वमात्मनः॥ २२४॥

*brahmabhūtastu saṁsṛtyai vidvānnāvartate punaḥ |*
*vijñātavyamataḥ samyagbrahmābhinnatvamātmanaḥ || **224**||*

सत्यं ज्ञानमनन्तं ब्रह्म विशुद्धं परं स्वतःसिद्धम्।

नित्यानन्दैकरसं प्रत्यगभिन्नं निरन्तरं जयति॥ 225॥

*satyaṁ jñānamanantaṁ brahma*
*viśuddhaṁ paraṁ svataḥsiddham|*
*nityānandaikarasaṁ pratyagabhinnaṁ nirantaraṁ jayati || **225**||*

सदिदं परमाद्वैतं स्वस्माद्न्यस्य वस्तुनोऽभावात्।

न ह्यन्यदस्ति किञ्चित् सम्यकखे परमार्थतत्त्वबोधदशायाम्॥ २२६॥

*sadidaṁ paramādvaitaṁ svasmādanyasya vastuno'bhāvāt |*
*na hyanyadasti kiñcit samyak*
*paramārthatattvabodhadaśāyām || **226**||*

यदिदं सकलं विश्वं नानारूपं प्रतीतमज्ञानात्।

तत्सर्वं ब्रह्मैव प्रत्यस्ताशेषभावनादोषम्॥ २२७॥

*yadidaṁ sakalaṁ viśvaṁ nānārūpaṁ pratītamajñānāt |*
*tatsarvaṁ brahmaiva pratyastāśeṣabhāvanādoṣam || **227**||*

मृत्कार्यभूतोऽपि मृदो न भिन्नः कुम्भोऽस्ति सर्वत्र तु मृत्स्वरूपात्।

न कुम्भरूपं पृथगस्ति कुम्भः कुतो मृषा कल्पितनाममात्रः॥ २२८॥

*mṛtkāryabhūto'pi mṛdo na bhinnaḥ*
*kumbho'sti sarvatra tu mṛtsvarūpāt |*
*na kumbharūpaṁ pṛthagasti kumbhaḥ*
*kuto mṛṣā kalpitanāmamātraḥ || **228**||*

केनापि मृद्भिन्नतया स्वरूपं घटस्य संदर्शयितुं न शक्यते।

अतो घटः कल्पित एव मोहा-न्मृदेव सत्यं परमार्थभूतम्॥ २२९॥

*kenāpi mṛdbhinnatayā svarūpaṁ*
*ghaṭasya sandarśayituṁ na śakyate |*
*ato ghaṭaḥ kalpita eva mohā-*
*nmṛdeva satyaṁ paramārthabhūtam || **229**||*

सदखेब्रह्मकार्यं सकलं सदेवं तन्मात्रमेतन्न ततोऽन्यदस्ति ।
अस्तीति यो वक्ति न तस्य मोहो विनिर्गतो निद्रितवत्प्रजल्पः ॥ **२३०** ॥

*sadbrahmakāryaṁ sakalaṁ sadevaṁ*
*tanmātrametanna tato'nyadasti* |
*astīti yo vakti na tasya moho*
*vinirgato nidritavatprajalpaḥ* || ***230***||

ब्रह्मैवेदं विश्वमित्येव वाणी श्रौती ब्रूतेऽथर्वनिष्ठा वरिष्ठा ।
तस्मादेतदखेब्रह्ममात्रं हि विश्वं नाधिष्ठानाद्भिन्नताऽऽरोपितस्य ॥ **२३१** ॥

*brahmaivedaṁ viśvamityeva vāṇī*
*śrautī brūte'tharvaniṣṭhā variṣṭhā* |
*tasmādetadbrahmamātraṁ hi viśvaṁ*
*nādhiṣṭhānādbhinnatā''ropitasya* || ***231***||

सत्यं यदि स्याज्जगदेतदात्मनोऽनन्तत्त्वहानिर्निगमाप्रमाणता ।
असत्यवादित्वमपीशितुः स्या-न्नैतत्त्रयं साधु हितं महात्मनाम् ॥ **२३२** ॥

*satyaṁ yadi syājjagadetadātmano'*
*nantattvahānirnigamāpramāṇatā* |
*asatyavāditvamapīśituḥ syā-*
*nnaitattrayaṁ sādhu hitaṁ mahātmanām* || ***232***||

ईश्वरो वस्तुतत्त्वज्ञो न चाहं तेष्ववस्थितः ।
न च मत्स्थानि भूतानीत्येवमेव व्यचीक्लृपत् ॥ **२३३** ॥

*īśvaro vastutattvajño na cāhaṁ teṣvavasthitaḥ* |
*na ca matsthāni bhūtānītyevameva vyacīklṛpat* || ***233***||

यदि सत्यं भवेद्विश्वं सुषुप्तावुपलभ्यताम् ।
यन्नोपलभ्यते किञ्चिदतोऽसत्स्वप्नवन्मृषा ॥ **२३४** ॥

*yadi satyaṁ bhavedviśvaṁ suṣuptāvupalabhyatām |*
*yannopalabhyate kiñcidato'satsvapnavanmṛṣā || **234**||*

अतः पृथङ्नास्ति जगत्परात्मनः
पृथक्प्रतीतिस्तु मृषा गुणादिवत् ।
आरोपितस्यास्ति किमर्थवत्ताऽ-
धिष्ठानमाभाति तथा भ्रमेण ॥ **२३५** ॥

*ataḥ pṛthaṅnāsti jagatparātmanaḥ*
*pṛthakpratītistu mṛṣā guṇādivat |*
*āropitasyāsti kimarthavattā'-*
*dhiṣṭhānamābhāti tathā bhrameṇa || **235**||*

भ्रान्तस्य यद्यद्भ्रमतः प्रतीतं
ब्रह्मैव तत्तद्रजतं हि शुक्तिः ।
इदंतया ब्रह्म सदैव रूप्यते
त्वारोपितं ब्रह्मणि नाममात्रम् ॥ **२३६** ॥

*bhrāntasya yadyadbhramataḥ pratītaṁ*
*brahmaiva tattadrajataṁ hi śuktiḥ |*
*idantayā brahma sadaiva rūpyate*
*tvāropitaṁ brahmaṇi nāmamātram || **236**||*

अतः परं ब्रह्म सदद्वितीयं

विशुद्धविज्ञानघनं निरञ्जनम् ।

प्राशान्तमाद्यन्तविहीनमक्रियं

निरन्तरानन्दरसस्वरूपम् ॥ **२३७** ॥

*ataḥ paraṁ brahma sadadvitīyaṁ*
*viśuddhavijñānaghanaṁ nirañjanam |*
*prāśāntamādyantavihīnamakriyaṁ*
*nirantarānandarasasvarūpam ||* ***237****||*

निरस्तमायाकृतसर्वभेदं

नित्यं सुखं निष्कलमप्रमेयम् ।

अरूपमव्यक्तमनाख्यमव्ययं

ज्योतिः स्वयं किञ्चिदिदं चकास्ति ॥ **२३८** ॥

*nirastamāyākṛtasarvabhedaṁ*
*nityaṁ sukhaṁ niṣkalamaprameyam |*
*arūpamavyaktamanākhyamavyayaṁ*
*jyotiḥ svayaṁ kiñcididaṁ cakāsti ||* ***238****||*

ज्ञातृज्ञेयज्ञानशून्यमनन्तं निर्विकल्पकम् ।

केवलाखण्डचिन्मात्रं परं तत्त्वं विदुर्बुधाः ॥ **२३९** ॥

*jñātṛjñeyajñānaśūnyamanantaṁ nirvikalpakam |*
*kevalākhaṇḍacinmātraṁ paraṁ tattvaṁ vidurbudhāḥ ||* ***239****||*

अहेयमनुपादेयं मनोवाचामगोचरम् ।

अप्रमेयमनाद्यन्तं ब्रह्म पूर्णमहं महः ॥ २४० ॥

*aheyamanupādeyaṁ manovācāmagocaram |*
*aprameyamanādyantaṁ brahma pūrṇamahaṁ mahaḥ || 240||*

तत्त्वंपदाभ्यामभिधीयमानयोः

ब्रह्मात्मनोः शोधितयोर्यदीत्थम् ।

श्रुत्या तयोस्तत्त्वमसीति सम्यग्

एकत्वमेव प्रतिपाद्यते मुहुः ॥ २४१ ।

*tattvampadābhyāmabhidhīyamānayoḥ*
*brahmātmanoḥ śodhitayoryadīttham |*
*śrutyā tayostattvamasīti samyag*
*ekatvameva pratipādyate muhuḥ || 241|*

ऐक्यं तयोर्लक्षितयोर्न वाच्ययोः

निगद्यतेऽन्योन्यविरुद्धधर्मिणोः ।

खद्योतभान्वोरिव राजभृत्ययोः

कूपाम्बुराश्योः परमाणुमेर्वोः ॥ २४२ ॥

*aikyaṁ tayorlakṣitayorna vācyayoḥ*
*nigadyate'nyonyaviruddhadharmiṇoḥ |*
*khadyotabhānvoriva rājabhṛtyayoḥ*
*kūpāmburāśyoḥ paramāṇumervoḥ || 242||*

तयोर्विरोधोऽयमुपाधिकल्पितो न वास्तवः कश्चिदुपाधिरेषः।

ईशस्य माया महदादिकारणं जीवस्य कार्यं शृणु पञ्चकोशम्॥ **२४३**॥

*tayorvirodho'yamupādhikalpito na vāstavaḥ kaścidupādhireṣaḥ |*
*īśasya māyā mahadādikāraṇaṁ*
*jīvasya kāryaṁ śṛṇu pañcakośam || **243**||*

एतावुपाधी परजीवयोस्तयोः सम्यङ्खेनिरासे न परो न जीवः।

राज्यं नरेन्द्रस्य भटस्य खेटकः तयोरपोहे न भटो न राजा॥ **२४४**॥

*etāvupādhī parajīvayostayoḥ*
*samyaṅnirāse na paro na jīvaḥ |*
*rājyaṁ narendrasya bhaṭasya kheṭakaḥ*
*tayorapohe na bhaṭo na rājā || **244**||*

अथात आदेश इति श्रुतिः स्वयं

निषेधति ब्रह्मणि कल्पितं द्वयम्।

श्रुतिप्रमाणानुगृहीतबोधा-

त्तयोर्निरासः करणीय एव॥ **२४५**॥

*athāta ādeśa iti śrutiḥ svayaṁ*
*niṣedhati brahmaṇi kalpitaṁ dvayam |*
*śrutipramāṇānugṛhītabodhā-*
*ttayornirāsaḥ karaṇīya eva || **245**||*

नेदं नेदं कल्पितत्वान्न सत्यं रज्जुदृष्टव्यालवत्स्वप्नवच्च।

इत्थं दृश्यं साधुयुक्त्या व्यपोह्य ज्ञेयः पश्चादेकभावस्तयोर्यः॥ **२४६**॥

*nedaṁ nedaṁ kalpitatvānna satyaṁ*
*rajjudṛṣṭavyālavatsvapnavacca |*
*itthaṁ dṛśyaṁ sādhuyuktyā vyapohya*
*jñeyaḥ paścādekabhāvastayoryaḥ || **246**||*

ततस्तु तौ लक्षणया सुलक्ष्यौ तयोरखण्डैकरसत्वसिद्धये ।
नालं जहत्या न तथाऽजहत्या किन्तूभयार्थात्मिकयैव भाव्यम् ॥ **२४७** ॥

*tatastu tau lakṣaṇayā sulakṣyau*
*tayorakhaṇḍaikarasatvasiddhaye |*
*nālaṁ jahatyā na tathā'jahatyā*
*kintūbhayārthātmikayaiva bhāvyam || **247**||*

स देवदत्तोऽयमितीह चैकता विरुद्धधर्मांशमपास्य कथ्यते ।
यथा तथा तत्त्वमसीतिवाक्ये विरुद्धधर्मानुभयत्र हित्वा ॥ **२४८** ॥

*sa devadatto'yamitīha caikatā*
*viruddhadharmāṁśamapāsya kathyate |*
*yathā tathā tattvamasītivākye*
*viruddhadharmānubhayatra hitvā || **248**||*

संलक्ष्य चिन्मात्रतया सदात्मनोः अखण्डभावः परिचीयते बुधैः ।
एवं महावाक्यशतेन कथ्यते ब्रह्मात्मनोरैक्यमखण्डभावः ॥ **२४९** ॥

*saṁlakṣya cinmātratayā sadātmanoḥ*
*akhaṇḍabhāvaḥ paricīyate budhaiḥ |*
*evaṁ mahāvākyaśatena kathyate*
*brahmātmanoraikyamakhaṇḍabhāvaḥ || **249**||*

अस्थूलमित्येतदसन्निरस्य सिद्धं स्वतो व्योमवदप्रतर्क्यम्।

अतो मृषामात्रमिदं प्रतीतं जहीहि यत्स्वात्मतया गृहीतम्।

ब्रह्माहमित्येव विशुद्धबुद्ध्या विद्धि स्वमात्मानमखण्डबोधम्॥ **२५०** ॥

*asthūlamityetadasannirasya*
*siddhaṁ svato vyomavadapratarkyam |*
*ato mṛṣāmātramidaṁ pratītaṁ*
*jahīhi yatsvātmatayā gṛhītam |*
*brahmāhamityeva viśuddhabuddhyā*
*viddhi svamātmānamakhaṇḍabodham || **250**||*

मृत्कार्यं सकलं घटादि सततं मृन्मात्रमेवाहितं

तद्वत्सज्जनितं सदात्मकमिदं सन्मात्रमेवाखिलम्।

यस्मान्नास्ति सतः परं किमपि तत्सत्यं स आत्मा स्वयं

तस्मात्तत्त्वमसि प्रशान्तममलं ब्रह्माद्वयं यत्परम्॥ **२५१** ॥

*mṛtkāryaṁ sakalaṁ ghaṭādi satataṁ mṛnmātramevāhitaṁ*
*tadvatsajjanitaṁ sadātmakamidaṁ sanmātramevākhilam |*
*yasmānnāsti sataḥ paraṁ kimapi tatsatyaṁ sa ātmā svayaṁ*
*tasmāttattvamasi praśāntamamalaṁ*
*brahmādvayaṁ yatparam || **251**||*

निद्राकल्पितदेशकालविषयज्ञात्रादि सर्वं यथा

मिथ्या तद्वदिहापि जाग्रति जगत्स्वाज्ञानकार्यत्वतः।

यस्मादेवमिदं शरीरकरणप्राणाहमाद्यप्यसत्

तस्मात्तत्त्वमसि प्रशान्तममलं ब्रह्माद्वयं यत्परम्॥ **२५२** ॥

*nidrākalpitadeśakālaviṣayajñātrādi sarvaṁ yathā*
*mithyā tadvadihāpi jāgrati jagatsvājñānakāryatvataḥ |*
*yasmādevamidaṁ śarīrakaraṇaprāṇāhamādyapyasat*
*tasmāttattvamasi praśāntamamalaṁ*
*brahmādvayaṁ yatparam ||* ***252****||*

यत्र भ्रान्त्या कल्पित तद्विवेके
तत्तन्मात्रं नैव तस्माद्विभिन्नम् ।
स्वप्ने नष्टं स्वप्नविश्वं विचित्रं
स्वस्माद्भिन्नं किन्नु दृष्टं प्रबोधे ॥ **२५३** ॥

*yatra bhrāntyā kalpita tadviveke*
*tattanmātraṁ naiva tasmādvibhinnam |*
*svapne naṣṭaṁ svapnaviśvaṁ vicitraṁ*
*svasmādbhinnaṁ kinnu dṛṣṭaṁ prabodhe ||* ***253****||*

जातिनीतिकुलगोत्रदूरगं
नामरूपगुणदोषवर्जितम् ।
देशकालविषयातिवर्ति यद्खे
ब्रह्म तत्त्वमसि भावयात्मनि ॥ **२५४** ॥

*jātinītikulagotradūragaṁ*
*nāmarūpaguṇadoṣavarjitam |*
*deśakālaviṣayātivarti yad*
*brahma tattvamasi bhāvayātmani ||* ***254****||*

यत्परं सकलवागगोचरं

गोचरं विमलबोधचक्षुषः ।

शुद्धचिद्घनमनादि वस्तु यद्‌खे

ब्रह्म तत्त्वमसि भावयात्मनि ॥ **२५५** ॥

*yatparaṁ sakalavāgagocaraṁ*
*gocaraṁ vimalabodhacakṣuṣaḥ /*
*śuddhacidghanamanādi vastu yad*
*brahma tattvamasi bhāvayātmani // **255**//*

षडखेभिरूर्मिभिरयोगि योगिहृद्खे-

भावितं न करणैर्विभावितम् ।

बुद्ध्यवेद्यमनवद्यमस्ति यद्‌खे

ब्रह्म तत्त्वमसि भावयात्मनि ॥ **२५६** ॥

*ṣaḍbhirūrmibhirayogi yogihṛd-*
*bhāvitaṁ na karaṇairvibhāvitam /*
*buddhyavedyamanavadyamasti yad*
*brahma tattvamasi bhāvayātmani // **256**//*

भ्रान्तिकल्पितजगत्कलाश्रयं स्वाश्रयं च सदसद्विलक्षणम् ।

निष्कलं निरुपमानवद्धि यद्‌खे ब्रह्म तत्त्वमसि भावयात्मनि ॥ **२५७** ॥

*bhrāntikalpitajagatkalāśrayaṁ*
*svāśrayaṁ ca sadasadvilakṣaṇam /*
*niṣkalaṁ nirupamānavaddhi yad*
*brahma tattvamasi bhāvayātmani // **257**//*

जन्मवृद्धिपरिणत्यपक्षय-व्याधिनाशनविहीनमव्ययम् ।

विश्वसृष्ट्यवविघातकारणं ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५८ ॥

*janmavṛddhipariṇatyapakṣaya-vyādhināśanavihīnamavyayam |*
*viśvasṛṣṭyavavighātakāraṇaṁ*
*brahma tattvamasi bhāvayātmani || **258**||*

अस्तभेदमनपास्तलक्षणं निस्तरङ्गजलराशिनिश्चलम् ।

नित्यमुक्तमविभक्तमूर्ति यदखे ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५९ ॥

*astabhedamanapāstalakṣaṇaṁ nistaraṅgajalarāśiniścalam |*
*nityamuktamavibhaktamūrti yad*
*brahma tattvamasi bhāvayātmani || **259**||*

एकमेव सदनेककारणं कारणान्तरनिरास्यकारणम् ।

कार्यकारणविलक्षणं स्वयं ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६० ॥

*ekameva sadanekakāraṇaṁ kāraṇāntaranirāsyakāraṇam |*
*kāryakāraṇavilakṣaṇaṁ svayaṁ*
*brahma tattvamasi bhāvayātmani || **260**||*

निर्विकल्पकमनल्पमक्षरं यत्क्षराक्षरविलक्षणं परम् ।

नित्यमव्ययसुखं निरञ्जनं ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६१ ॥

*nirvikalpakamanalpamakṣaraṁ yatkṣarākṣaravilakṣaṇaṁ param |*
*nityamavyayasukhaṁ nirañjanaṁ*
*brahma tattvamasi bhāvayātmani || **261**||*

यद्विभाति सदनेकधा भ्रमा-न्नामरूपगुणविक्रियात्मना ।

हेमवत्स्वयमविक्रियं सदा ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६२ ॥

*yadvibhāti sadanekadhā bhramā-nnāmarūpaguṇavikriyātmanā |*
*hemavatsvayamavikriyaṁ sadā*
*brahma tattvamasi bhāvayātmani || **262**||*

यच्चकास्त्यनपरं परात्परं प्रत्यगेकरसमात्मलक्षणम् ।

सत्यचित्सुखमनन्तमव्ययं ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६३ ॥

*yaccakāstyanaparaṁ parātparaṁ pratyagekarasamātmalakṣaṇam |*
*satyacitsukhamanantamavyayaṁ*
*brahma tattvamasi bhāvayātmani || **263**||*

उक्तमर्थमिममात्मनि स्वयं भावयेत्प्रथितयुक्तिभिर्धिया ।

संशयादिरहितं कराम्बुवत् तेन तत्त्वनिगमो भविष्यति ॥ २६४ ॥

*uktamarthamimamātmani svayaṁ*
*bhāvayetprathitayuktibhirdhiyā |*
*saṁśayādirahitaṁ karāmbuvat*
*tena tattvanigamo bhaviṣyati || **264**||*

सम्बोधमात्रं परिशुद्धतत्त्वं विज्ञाय संघे नृपवच्च सैन्ये ।

तदाश्रयः स्वात्मनि सर्वदा स्थितो विलापय ब्रह्मणि विश्वजातम् ॥ २६५ ॥

*sambodhamātraṁ pariśuddhatattvaṁ*
*vijñāya saṅghe nṛpavacca sainye |*
*tadāśrayaḥ svātmani sarvadā sthito*
*vilāpaya brahmaṇi viśvajātam || **265**||*

बुद्धौ गुहायां सदसद्विलक्षणं ब्रह्मास्ति सत्यं परमद्वितीयम् ।

तदात्मना योऽत्र वसेद्गुहायां पुनर्न तस्याङ्गगुहाप्रवेशः ॥ २६६ ॥

*buddhau guhāyāṁ sadasadvilakṣaṇaṁ*
*brahmāsti satyaṁ paramadvitīyam |*
*tadātmanā yo'tra vasedguhāyāṁ*
*punarna tasyāṅgaguhāpraveśaḥ || **266**||*

ज्ञाते वस्तुन्यपि बलवती वासनाऽनादिरेषा

कर्ता भोक्ताप्यहमिति दृढा याऽस्य संसारहेतुः ।

प्रत्यग्दृष्ट्याऽऽत्मनि निवसता सापनेया प्रयत्ना-

न्मुक्तिं प्राहुस्तदिह मुनयो वासनातानवं यत् ॥ २६७ ॥

*jñāte vastunyapi balavatī vāsanā'nādireṣā*
*kartā bhoktāpyahamiti dṛḍhā yā'sya saṁsārahetuḥ |*
*pratyagdṛṣṭyā''tmani nivasatā sāpaneyā prayatnā-*
*nmuktiṁ prāhustadiha munayo vāsanātānavaṁ yat || **267**||*

अहं ममेति यो भावो देहाक्षादावनात्मनि ।

अध्यासोऽयं निरस्तव्यो विदुषा स्वात्मनिष्ठया ॥ २६८ ॥

*ahaṁ mameti yo bhāvo dehākṣādāvanātmani |*
*adhyāso'yaṁ nirastavyo viduṣā svātmaniṣṭhayā || **268**||*

ज्ञात्वा स्वं प्रत्यगात्मानं बुद्धितद्वृत्तिसाक्षिणम् ।

सोऽहमित्येव सद्वृत्त्याऽनात्मन्यात्ममतिं जहि ॥ २६९ ॥

*jñātvā svaṁ pratyagātmānaṁ buddhitadvṛttisākṣiṇam |*
*so'hamityeva sadvṛttyā'nātmanyātmamatiṁ jahi || **269**||*

लोकानुवर्तनं त्यक्त्वा त्यक्त्वा देहानुवर्तनम् ।

शास्त्रानुवर्तनं त्यक्त्वा स्वाध्यासापनयं कुरु ॥ **२७०** ॥

*lokānuvartanaṁ tyaktvā tyaktvā dehānuvartanam |*
*śāstrānuvartanaṁ tyaktvā svādhyāsāpanayaṁ kuru || 270||*

लोकवासनया जन्तोः शास्त्रवासनयापि च ।

देहवासनया ज्ञानं यथावन्नैव जायते ॥ **२७१** ॥

*lokavāsanayā jantoḥ śāstravāsanayāpi ca |*
*dehavāsanayā jñānaṁ yathāvannaiva jāyate || 271||*

संसारकारागृहमोक्षमिच्छो-रयोमयं पादनिबन्धशृंखलम् ।

वदन्ति तज्ज्ञाः पटु वासनात्रयं योऽस्माद्विमुक्तः समुपैति मुक्तिम् ॥ **२७२** ॥

*saṁsārakārāgṛhamokṣamiccho-*
*rayomayaṁ pādanibandhaśṛṅkhalam |*
*vadanti tajjñāḥ paṭu vāsanātrayaṁ*
*yo'smādvimuktaḥ samupaiti muktim || 272||*

जलादिसंसर्गवशात्प्रभूत-दुर्गन्धधूताऽगरुदिव्यवासना ।

संघर्षणेनैव विभाति सम्य-ग्विधूयमाने सति बाह्यगन्धे ॥ **२७३** ॥

*jalādisaṁsargavaśātprabhūta-*
*durgandhadhūtā'garudivyavāsanā |*
*saṅgharṣaṇenaiva vibhāti samya-*
*gvidhūyamāne sati bāhyagandhe || 273||*

अन्तःश्रितानन्तदूरन्तवासना-

धूलीविलिप्ता परमात्मवासना ।

प्रज्ञातिसंघर्षणतो विशुद्धा

प्रतीयते चन्दनगन्धवत् स्फुटम् ॥ **२७४** ॥

*antaḥśritānantadūrantavāsanā-*
*dhūlīviliptā paramātmavāsanā /*
*prajñātisaṅgharṣaṇato viśuddhā*
*pratīyate candanagandhavat sphuṭam // **274**//*

अनात्मवासनाजालैस्तिरोभूतात्मवासना ।

नित्यात्मनिष्ठया तेषां नाशे भाति स्वयं स्फुटम् ॥ **२७५** ॥

*anātmavāsanājālaistirobhūtātmavāsanā /*
*nityātmaniṣṭhayā teṣāṁ nāśe bhāti svayaṁ sphuṭam // **275**//*

यथा यथा प्रत्यगवस्थितं मनः

तथा तथा मुञ्चति बाह्यवासनाम् ।

निःशेषमोक्षे सति वासनानां

आत्मानुभूतिः प्रतिबन्धशून्या ॥ **२७६** ॥

*yathā yathā pratyagavasthitaṁ manaḥ*
*tathā tathā muñcati bāhyavāsanām /*
*niḥśeṣamokṣe sati vāsanānāṁ*
*ātmānubhūtiḥ pratibandhaśūnyā // **276**//*

स्वात्मन्येव सदा स्थित्वा मनो नश्यति योगिनः।
वासनानां क्षयश्चातः स्वाध्यासापनयं कुरु॥ २७७॥

*svātmanyeva sadā sthitvā mano naśyati yoginaḥ |*
*vāsanānāṁ kṣayaścātaḥ svādhyāsāpanayaṁ kuru || 277||*

तमो द्वाभ्यां रजः सत्त्वात्सत्त्वं शुद्धेन नश्यति।
तस्मात्सत्त्वमवष्टभ्य स्वाध्यासापनयं कुरु॥ २७८॥

*tamo dvābhyāṁ rajaḥ sattvātsattvaṁ śuddhena naśyati |*
*tasmātsattvamavaṣṭabhya svādhyāsāpanayaṁ kuru || 278||*

प्रारब्धं पुष्यति वपुरिति निश्चित्य निश्चलः।
धैर्यमालम्ब्य यत्नेन स्वाध्यासापनयं कुरु॥ २७९॥

*prārabdhaṁ puṣyati vapuriti niścitya niścalaḥ |*
*dhairyamālambya yatnena svādhyāsāpanayaṁ kuru || 279||*

नाहं जीवः परं ब्रह्मेत्यतद्व्यावृत्तिपूर्वकम्।
वासनावेगतः प्राप्तस्वाध्यासापनयं कुरु॥ २८०॥

*nāhaṁ jīvaḥ paraṁ brahmetyatadvyāvṛttipūrvakam |*
*vāsanāvegataḥ prāptasvādhyāsāpanayaṁ kuru || 280||*

श्रुत्या युक्त्या स्वानुभूत्या ज्ञात्वा सार्वात्म्यमात्मनः।
क्वचिदाभासतः प्राप्तस्वाध्यासापनयं कुरु॥ २८१॥

*śrutyā yuktyā svānubhūtyā jñātvā sārvātmyamātmanaḥ |*
*kvacidābhāsataḥ prāptasvādhyāsāpanayaṁ kuru || 281||*

अनादानविसर्गाभ्यामीषन्नास्ति क्रिया मुनेः ।

तदेकनिष्ठया नित्यं स्वाध्यासापनयं कुरु ॥ **२८२** ॥

*anādānavisargābhyāmīṣannāsti kriyā muneḥ /*
*tadekaniṣṭhayā nityaṁ svādhyāsāpanayaṁ kuru // **282**//*

तत्त्वमस्यादिवाक्योत्थब्रह्मात्मैकत्वबोधतः ।

ब्रह्मण्यात्मत्वदार्ढ्याय स्वाध्यासापनयं कुरु ॥ **२८३** ॥

*tattvamasyādivākyotthabrahmātmaikatvabodhataḥ /*
*brahmaṇyātmatvadārḍhyāya svādhyāsāpanayaṁ kuru // **283**//*

अहंभावस्य देहेऽस्मिन्निःशेषविलयावधि ।

सावधानेन युक्तात्मा स्वाध्यासापनयं कुरु ॥ **२८४** ॥

*ahambhāvasya dehe'sminniḥśeṣavilayāvadhi /*
*sāvadhānena yuktātmā svādhyāsāpanayaṁ kuru // **284**//*

प्रतीतिर्जीवजगतोः स्वप्नवद्भाति यावता ।

तावन्निरन्तरं विद्वन्स्वाध्यासापनयं कुरु ॥ **२८५** ॥

*pratītirjīvajagatoḥ svapnavadbhāti yāvatā /*
*tāvannirantaraṁ vidvansvādhyāsāpanayaṁ kuru // **285**//*

निद्राया लोकवार्तायाः शब्दादेरपि विस्मृतेः ।

क्वचिन्नावसरं दत्त्वा चिन्तयात्मानमात्मनि ॥ **२८६** ॥

*nidrāyā lokavārtāyāḥ śabdāderapi vismṛteḥ /*
*kvacinnāvasaraṁ dattvā cintayātmānamātmani // **286**//*

मातापित्रोर्मलोद्भूतं मलमांसमयं वपुः ।

त्यक्त्वा चाण्डालवद्दूरं ब्रह्मीभूय कृती भव ॥ २८७ ॥

*mātāpitrormalodbhūtaṁ malamāṁsamayaṁ vapuḥ |*
*tyaktvā cāṇḍālavaddūraṁ brahmībhūya kṛtī bhava ||* ***287****||*

घटाकाशं महाकाश इवात्मानं परात्मनि ।

विलाप्याखण्डभावेन तूष्णी भव सदा मुने ॥ २८८ ॥

*ghaṭākāśaṁ mahākāśa ivātmānaṁ parātmani |*
*vilāpyākhaṇḍabhāvena tūṣṇī bhava sadā mune ||* ***288****||*

स्वप्रकाशमधिष्ठानं स्वयंभूय सदात्मना ।

ब्रह्माण्डमपि पिण्डाण्डं त्यज्यतां मलभाण्डवत् ॥ २८९ ॥

*svaprakāśamadhiṣṭhānaṁ svayambhūya sadātmanā |*
*brahmāṇḍamapi piṇḍāṇḍaṁ tyajyatāṁ malabhāṇḍavat ||* ***289****||*

चिदात्मनि सदानन्दे देहारूढामहंधियम् ।

निवेश्य लिङ्गमुत्सृज्य केवलो भव सर्वदा ॥ २९० ॥

*cidātmani sadānande dehārūḍhāmahandhiyam |*
*niveśya liṅgamutsṛjya kevalo bhava sarvadā ||* ***290****||*

यत्रैष जगदाभासो दर्पणान्तः पुरं यथा ।

तद्ब्रह्माहमिति ज्ञात्वा कृतकृत्यो भविष्यसि ॥ २९१ ॥

*yatraiṣa jagadābhāso darpaṇāntaḥ puraṁ yathā |*
*tadbrahmāhamiti jñātvā kṛtakṛtyo bhaviṣyasi ||* ***291****||*

यत्सत्यभूतं निजरूपमाद्यं चिदद्वयानन्दमरूपमक्रियम्।

तदेत्य मिथ्यावपुरुत्सृजेत शैलूषवद्वेषमुपात्तमात्मनः॥ **२९२**॥

*yatsatyabhūtaṁ nijarūpamādyaṁ*
*cidadvayānandamarūpamakriyam /*
*tadetya mithyāvapurutsṛjeta*
*śailūṣavadveṣamupāttamātmanaḥ // **292**//*

सर्वात्मना दृश्यमिदं मृषैव नैवाहमर्थः क्षणिकत्वदर्शनात्।

जानाम्यहं सर्वमिति प्रतीतिः कुतोऽहमादेः क्षणिकस्य सिध्येत्॥ **२९३**॥

*sarvātmanā dṛśyamidaṁ mṛṣaiva*
*naivāhamarthaḥ kṣaṇikatvadarśanāt /*
*jānāmyahaṁ sarvamiti pratītiḥ*
*kuto'hamādeḥ kṣaṇikasya sidhyet // **293**//*

अहंपदार्थस्त्वहमादिसाक्षी नित्यं सुषुप्तावपि भावदर्शनात्।

ब्रूते ह्यजो नित्य इति श्रुतिः स्वयं तत्प्रत्यगात्मा सदसद्विलक्षणः॥ **२९४**॥

*ahampadārthastvahamādisākṣī nityaṁ suṣuptāvapi bhāvadarśanāt /*
*brūte hyajo nitya iti śrutiḥ svayaṁ*
*tatpratyagātmā sadasadvilakṣaṇaḥ // **294**//*

विकारिणां सर्वविकारवेत्ता नित्याविकारो भवितुं समर्हति।

मनोरथस्वप्नसुषुप्तिषु स्फुटं पुनः पुनर्दृष्टमसत्त्वमेतयोः॥ **२९५**॥

*vikāriṇāṁ sarvavikāravettā nityāvikāro bhavituṁ samarhati /*
*manorathasvapnasuṣuptiṣu sphuṭaṁ*
*punaḥ punardṛṣṭamasattvametayoḥ // **295**//*

अतोऽभिमानं त्यज मांसपिण्डे पिण्डाभिमानिन्यपि बुद्धिकल्पिते ।
कालत्रयाबाध्यमखण्डबोधं ज्ञात्वा स्वमात्मानमुपैहि शान्तिम् ॥ २९६ ॥

*ato'bhimānaṁ tyaja māṁsapiṇḍe*
*piṇḍābhimāninyapi buddhikalpite |*
*kālatrayābādhyamakhaṇḍabodhaṁ*
*jñātvā svamātmānamupaihi śāntim || **296**||*

त्यजाभिमानं कुलगोत्रनाम-रूपाश्रमेष्वार्द्रशवाश्रितेषु ।
लिङ्गस्य धर्मानपि कर्तृतादिं-स्त्यक्ता भवाखण्डसुखस्वरूपः ॥ २९७ ॥

*tyajābhimānaṁ kulagotranāma-*
*rūpāśrameṣvārdraśavāśriteṣu |*
*liṅgasya dharmānapi kartṛtādiṁ-*
*styaktā bhavākhaṇḍasukhasvarūpaḥ || **297**||*

सन्त्यन्ये प्रतिबन्धाः पुंसः संसारहेतवो दृष्टाः ।
तेषामेवं मूलं प्रथमविकारो भवत्यहंकारः ॥ २९८ ॥

*santyanye pratibandhāḥ puṁsaḥ saṁsārahetavo dṛṣṭāḥ |*
*teṣāmevaṁ mūlaṁ prathamavikāro bhavatyahaṅkāraḥ || **298**||*

यावत्स्यात्स्वस्य सम्बन्धोऽहंकारेण दुरात्मना ।
तावन्न लेशमात्रापि मुक्तिवार्ता विलक्षणा ॥ २९९ ॥

*yāvatsyātsvasya sambandho'haṅkāreṇa durātmanā |*
*tāvanna leśamātrāpi muktivārtā vilakṣaṇā || **299**||*

अहंकारग्रहान्मुक्तः स्वरूपमुपपद्यते ।

चन्द्रवद्विमलः पूर्णः सदानन्दः स्वयंप्रभः ॥ ३०० ॥

*ahaṅkāragrahānmuktaḥ svarūpamupapadyate |*
*candravadvimalaḥ pūrṇaḥ sadānandaḥ svayamprabhaḥ || 300||*

यो वा पुरे सोऽहमिति प्रतीतो

बुद्ध्या प्रक्लृप्तस्तमसाऽतिमूढया ।

तस्यैव निःशेषतया विनाशे

ब्रह्मात्मभावः प्रतिबन्धशून्यः ॥ ३०१ ॥

*yo vā pure so'hamiti pratīto*
*buddhyā praklṛptastamasā'timūḍhayā |*
*tasyaiva niḥśeṣatayā vināśe*
*brahmātmabhāvaḥ pratibandhaśūnyaḥ || 301||*

ब्रह्मानन्दनिधिर्महाबलवताऽहंकारघोराहिना

संवेष्ट्यात्मनि रक्ष्यते गुणमयैश्चण्डेस्त्रिभिर्मस्तकैः

विज्ञानाख्यमहासिना श्रुतिमता विच्छिद्य शीर्षत्रयं

निर्मूल्याहिमिमं निधिं सुखकरं धीरोऽनुभोक्तुंक्षमः ॥ ३०२ ॥

*brahmānandanidhirmahābalavatā'haṅkāraghorāhinā*
*saṁveṣṭyātmani rakṣyate guṇamayaiścaṇḍestribhirmastakaiḥ*
*vijñānākhyamahāsinā śrutimatā vicchidya śīrṣatrayaṁ*
*nirmūlyāhimimaṁ nidhiṁ sukhakaraṁ*
*dhīro'nubhoktuṅkṣamaḥ || 302||*

यावद्वा यत्किञ्चिद्विषदोषस्फूर्तिरस्ति चेद्देहे ।
कथमारोग्याय भवेत्तद्वदहन्तापि योगिनो मुक्त्यै ॥ ३०३ ॥

*yāvadvā yatkiñcidviṣadoṣasphūrtirasti ceddehe |*
*kathamārogyāya bhavettadvadahantāpi yogino muktyai || 303||*

अहमोऽत्यन्तनिवृत्त्या तत्कृतनानाविकल्पसंहृत्या ।
प्रत्यक्तत्त्वविवेकादिदमहमस्मीति विन्दते तत्त्वम् ॥ ३०४ ॥

*ahamo'tyantanivṛttyā tatkṛtanānāvikalpasaṁhṛtyā |*
*pratyaktattvavivekādidamahamasmīti vindate tattvam || 304||*

अहंकारे कर्तर्यहमिति मतिं मुञ्च सहसा
विकारात्मन्यात्मप्रतिफलजुषि स्वस्थितिमुषि ।
यदध्यासात्प्राप्ता जनिमृतिजरादुःखबहुला
प्रतीचश्चिन्मूर्तेस्तव सुखतनोः संसृतिरियम् ॥ ३०५ ॥

*ahaṅkāre kartaryahamiti matiṁ muñca sahasā*
*vikārātmanyātmapratiphalajuṣi svasthitimuṣi |*
*yadadhyāsātprāptā janimṛtijarāduḥkhabahulā*
*pratīcaścinmūrtestava sukhatanoḥ saṁsṛtiriyam || 305||*

सदैकरूपस्य चिदात्मनो विभो-रानन्दमूर्तेरनवद्यकीर्तेः ।
नैवान्यथा क्वाप्यविकारिणस्ते विनाहमध्यासममुष्य संसृतिः ॥ ३०६ ॥

*sadaikarūpasya cidātmano vibho-rānandamūrteranavadyakīrteḥ |*
*naivānyathā kvāpyavikāriṇaste*
*vināhamadhyāsamamuṣya saṁsṛtiḥ || 306||*

तस्मादहंकारमिमं स्वशत्रुं

भोक्तुर्गले कण्टकवत्प्रतीतम्।

विच्छिद्य विज्ञानमहासिना स्फुटं

भुङ्क्ष्वात्मसाम्राज्यसुखं यथेष्टम्॥ ३०७॥

*tasmādahaṅkāramimaṁ svaśatruṁ*
*bhokturgale kaṇṭakavatpratītam |*
*vicchidya vijñānamahāsinā sphuṭaṁ*
*bhuṅkṣvātmasāmrājyasukhaṁ yatheṣṭam || 307||*

ततोऽहमादेर्विनिवर्त्य वृत्तिं

संत्यक्तरागः परमार्थलाभात्।

तूष्णीं समास्स्वात्मसुखानुभूत्या

पूर्णात्मना ब्रह्मणि निर्विकल्पः॥ ३०८॥

*tato'hamādervinivartya vṛttiṁ*
*santyaktarāgaḥ paramārthalābhāt |*
*tūṣṇīṁ samāssvātmasukhānubhūtyā*
*pūrṇātmanā brahmaṇi nirvikalpaḥ || 308||*

समूलकृत्तोऽपि महानहं पुनः व्युल्लेखितः स्याद्यदि चेतसा क्षणम्।

संजीव्य विक्षेपशतं करोति नभस्वता प्रावृषि वारिदो यथा॥ ३०९॥

*samūlakṛtto'pi mahānahaṁ punaḥ*
*vyullekhitaḥ syādyadi cetasā kṣaṇam |*
*sañjīvya vikṣepaśataṁ karoti*
*nabhasvatā prāvṛṣi vārido yathā || 309||*

निगृह्य शत्रोरहमोऽवकाशः
क्वचिन्न देयो विषयानुचिन्तया ।
स एव संजीवनहेतुरस्य
प्रक्षीणजम्बीरतरोरिवाम्बु ॥ **३१०** ॥

*nigṛhya śatrorahamo'vakāśaḥ*
*kvacinna deyo viṣayānucintayā |*
*sa eva sañjīvanaheturasya*
*prakṣīṇajambīratarorivāmbu || **310**||*

देहात्मना संस्थित एव कामी
विलक्षणः कामयिता कथं स्यात् ।
अतोऽर्थसन्धानपरत्वमेव
भेदप्रसक्त्या भवबन्धहेतुः ॥ **३११** ॥

*dehātmanā saṁsthita eva kāmī*
*vilakṣaṇaḥ kāmayitā kathaṁ syāt |*
*ato'rthasandhānaparatvameva*
*bhedaprasaktyā bhavabandhahetuḥ || **311**||*

कार्यप्रवर्धनाद्बीजप्रवृद्धिः परिदृश्यते ।
कार्यनाशाद्बीजनाशस्तस्मात्कार्यं निरोधयेत् ॥ **३१२** ॥

*kāryapravardhanādbījapravṛddhiḥ paridṛśyate |*
*kāryanāśādbījanāśastasmātkāryaṁ nirodhayet || **312**||*

वासनावृद्धितः कार्यं कार्यवृद्ध्या च वासना ।
वर्धते सर्वथा पुंसः संसारो न निवर्तते ॥ **३१३** ॥

*vāsanāvṛddhitaḥ kāryaṁ kāryavṛddhyā ca vāsanā /*
*vardhate sarvathā puṁsaḥ saṁsāro na nivartate // **313**//*

संसारबन्धविच्छित्त्यै तद्द्वयं प्रदहेद्यतिः ।
वासनावृद्धिरेताभ्यां चिन्तया क्रियया बहिः ॥ **३१४** ॥

*saṁsārabandhavicchittyai tad dvayaṁ pradahedyatiḥ /*
*vāsanāvṛddhiretābhyāṁ cintayā kriyayā bahiḥ // **314**//*

ताभ्यां प्रवर्धमाना सा सूते संसृतिमात्मनः ।
त्रयाणां च क्षयोपायः सर्वावस्थासु सर्वदा ॥ **३१५** ॥

*tābhyāṁ pravardhamānā sā sūte saṁsṛtimātmanaḥ /*
*trayāṇāṁ ca kṣayopāyaḥ sarvāvasthāsu sarvadā // **315**//*

सर्वत्र सर्वतः सर्वब्रह्ममात्रावलोकनैः ।
सद्भाववासनादार्ढ्यात्तत्त्रयं लयमश्नुते ॥ **३१६** ॥

*sarvatra sarvataḥ sarvabrahmamātrāvalokanaiḥ /*
*sadbhāvavāsanādārḍhyāttattrayaṁ layamaśnute // **316**//*

क्रियानाशे भवेच्चिन्तानाशोऽस्माद्वासनाक्षयः ।
वासनाप्रक्षयो मोक्षः सा जीवन्मुक्तिरिष्यते ॥ **३१७** ॥

*kriyānāśe bhaveccintānāśo'smādvāsanākṣayaḥ /*
*vāsanāprakṣayo mokṣaḥ sā jīvanmuktiriṣyate // **317**//*

सद्वासनास्फूर्तिविजृम्भणे सति ह्यसौ विलीनाप्यहमादिवासना ।

अतिप्रकृष्टाप्यरुणप्रभायां विलीयते साधु यथा तमिस्रा ॥ ३१८ ॥

*sadvāsanāsphūrtivijṛmbhaṇe sati hyasau vilīnāpyahamādivāsanā |*
*atiprakṛṣṭāpyaruṇaprabhāyāṁ*
*vilīyate sādhu yathā tamisrā || **318**||*

तमस्तमःकार्यमनर्थजालं न दृश्यते सत्युदिते दिनेशे ।

तथाऽद्वयानन्दरसानुभूतौ न वास्ति बन्धो न च दुःखगन्धः ॥ ३१९ ॥

*tamastamaḥkāryamanarthajālaṁ na dṛśyate satyudite dineśe |*
*tathā'dvayānandarasānubhūtau*
*na vāsti bandho na ca duḥkhagandhaḥ || **319**||*

दृश्यं प्रतीतं प्रविलापयन्सन्

सन्मात्रमानन्दघनं विभावयन् ।

समाहितः सन्बहिरन्तरं वा

कालं नयेथाः सति कर्मबन्धे ॥ ३२० ॥

*dṛśyaṁ pratītaṁ pravilāpayansan*
*sanmātramānandaghanaṁ vibhāvayan |*
*samāhitaḥ sanbahirantaraṁ vā*
*kālaṁ nayethāḥ sati karmabandhe || **320**||*

प्रमादो ब्रह्मनिष्ठायां न कर्तव्यः कदाचन ।

प्रमादो मृत्युरित्याह भगवान्ब्रह्मणः सुतः ॥ ३२१ ॥

*pramādo brahmaniṣṭhāyāṁ na kartavyaḥ kadācana |*
*pramādo mṛtyurityāha bhagavānbrahmaṇaḥ sutaḥ || **321**||*

न प्रमादादनर्थोऽन्यो ज्ञानिनः स्वस्वरूपतः ।

ततो मोहस्ततोऽहंधीस्ततो बन्धस्ततो व्यथा ॥ **३२२** ॥

*na pramādādanartho'nyo jñāninaḥ svasvarūpataḥ |*
*tato mohastato'handhīstato bandhastato vyathā || **322**||*

विषयाभिमुखं दृष्ट्वा विद्वांसमपि विस्मृतिः ।

विक्षेपयति धीदोषैर्योषा जारमिव प्रियम् ॥ **३२३** ॥

*viṣayābhimukhaṁ dṛṣṭvā vidvāṁsamapi vismṛtiḥ |*
*vikṣepayati dhīdoṣairyoṣā jāramiva priyam || **323**||*

यथापकृष्टं शैवालं क्षणमात्रं न तिष्ठति ।

आवृणोति तथा माया प्राज्ञं वापि पराङ्मुखम् ॥ **३२४** ॥

*yathāpakṛṣṭaṁ śaivālaṁ kṣaṇamātraṁ na tiṣṭhati |*
*āvṛṇoti tathā māyā prājñaṁ vāpi parāṅmukham || **324**||*

लक्ष्यच्युतं चेद्यदि चित्तमीषद्

बहिर्मुखं सन्निपतेत्ततस्ततः ।

प्रमादतः प्रच्युतकेलिकन्दुकः

सोपानपङ्क्तौ पतितो यथा तथा ॥ **३२५** ॥

*lakṣyacyutaṁ cedyadi cittamīṣad*
*bahirmukhaṁ sannipatettatastataḥ |*
*pramādataḥ pracyutakelikandukaḥ*
*sopānapaṅktau patito yathā tathā || **325**||*

विषयेष्वाविशच्चेतः संकल्पयति तद्गुणान् ।

सम्यक्संकल्पनात्कामः कामात्पुंसः प्रवर्तनम् ॥ ३२६ ॥

*viṣayeṣvāviśaccetaḥ saṅkalpayati tadguṇān /*
*samyaksaṅkalpanātkāmaḥ kāmātpuṁsaḥ pravartanam // **326**//*

ततः स्वरूपविभ्रंशो विभ्रष्टस्तु पतत्यधः ।

पतितस्य विना नाशं पुनर्नारोह ईक्ष्यते ॥ ३२७ ॥

*tataḥ svarūpavibhraṁśo vibhraṣṭastu patatyadhaḥ /*
*patitasya vinā nāśaṁ punarnāroha īkṣyate // **327**//*

संकल्पं वर्जयेत्तस्मात्सर्वानर्थस्य कारणम् ।

अपथ्यानि हि वस्थूनि व्याधिग्रस्तो यथोत्सृजेत् ॥ ३२८ ॥

*saṅkalpaṁ varjayettasmātsarvānarthasya kāraṇam /*
*apathyāni hi vasthūni vyādhigrasto yathotsṛjet // **328**//*

अतः प्रमादान्न परोऽस्ति मृत्युः

विवेकिनो ब्रह्मविदः समाधौ ।

समाहितः सिद्धिमुपैति सम्यकस्वे

समाहितात्मा भव सावधानः ॥ ३२९ ॥

*ataḥ pramādānna paro'sti mṛtyuḥ*
*vivekino brahmavidaḥ samādhau /*
*samāhitaḥ siddhimupaiti samyak*
*samāhitātmā bhava sāvadhānaḥ // **329**//*

जीवतो यस्य कैवल्यं विदेहे स च केवलः।
यत्किंचित्पश्यतो भेदं भयं ब्रूते यजुः श्रुतिः॥ ३३०॥

*jīvato yasya kaivalyaṁ videhe sa ca kevalaḥ /*
*yatkiñcitpaśyato bhedaṁ bhayaṁ brūte yajuḥ śrutiḥ // **330**//*

यदा कदा वापि विपश्चिदेष
ब्रह्मण्यनन्तेऽप्यणुमात्रभेदम्।
पश्यत्यथामुष्य भयं तदैव
यद्वीक्षितं भिन्नतया प्रमादात्॥ ३३१॥

*yadā kadā vāpi vipaścideṣa*
*brahmaṇyanante'pyaṇumātrabhedam /*
*paśyatyathāmuṣya bhayaṁ tadaiva*
*yadvīkṣitaṁ bhinnatayā pramādāt // **331**//*

श्रुतिस्मृतिन्यायशतैर्निषिद्धे
दृश्येऽत्र यः स्वात्ममतिं करोति।
उपैति दुःखोपरि दुःखजातं
निषिद्धकर्ता स मलिम्लुचो यथा॥ ३३२॥

*śrutismṛtinyāyaśatairniṣiddhe*
*dṛśye'tra yaḥ svātmamatiṁ karoti /*
*upaiti duḥkhopari duḥkhajātaṁ*
*niṣiddhakartā sa malimluco yathā // **332**//*

सत्याभिसंधानरतो विमुक्तो

महत्त्वमात्मीयमुपैति नित्यम्।

मिथ्याभिसन्धानरतस्तु नश्येद्

दृष्टं तदेतद्यदचौरचौरयोः॥ ३३३॥

*satyābhisandhānarato vimukto*
*mahattvamātmīyamupaiti nityam |*
*mithyābhisandhānaratastu naśyed*
*dṛṣṭaṁ tadetadyadacauracaurayoḥ || **333**||*

यतिरसदनुसन्धिं बन्धहेतुं विहाय

स्वयमयमहमस्मीत्यात्मदृष्ट्यैव तिष्ठेत्

सुखयति ननु निष्ठा ब्रह्मणि स्वानुभूत्या

हरति परमविद्याकार्यदुःखं प्रतीतम्॥ ३३४॥

*yatirasadanusandhiṁ bandhahetuṁ vihāya*
*svayamayamahamasmītyātmadṛṣṭyaiva tiṣṭhet*
*sukhayati nanu niṣṭhā brahmaṇi svānubhūtyā*
*harati paramavidyākāryaduḥkhaṁ pratītam || **334**||*

बाह्यानुसन्धिः परिवर्धयेत्फलं दुर्वासनामेव ततस्ततोऽधिकाम्।

ज्ञात्वा विवेकैः परिहृत्य बाह्यं स्वात्मानुसन्धिं विदधीत नित्यम्॥ ३३५॥

*bāhyānusandhiḥ parivardhayetphalaṁ*
*durvāsanāmeva tatastato'dhikām |*
*jñātvā vivekaiḥ parihṛtya bāhyaṁ*
*svātmānusandhiṁ vidadhīta nityam || **335**||*

बाह्ये निरुद्धे मनसः प्रसन्नता

मनःप्रसादे परमात्मदर्शनम् ।

तस्मिन्सुदृष्टे भवबन्धनाशो

बहिर्निरोधः पदवी विमुक्तेः ॥ **३३६** ॥

*bāhye niruddhe manasaḥ prasannatā*
*manaḥprasāde paramātmadarśanam /*
*tasminsudṛṣṭe bhavabandhanāśo*
*bahirnirodhaḥ padavī vimukteḥ // **336**//*

कः पण्डितः सन्सदसद्विवेकी श्रुतिप्रमाणः परमार्थदर्शी ।

जानन्हि कुर्यादसतोऽवलम्बं स्वपातहेतोः शिशुवन्मुमुक्षुः ॥ **३३७** ॥

*kaḥ paṇḍitaḥ sansadasadvivekī*
*śrutipramāṇaḥ paramārthadarśī /*
*jānanhi kuryādasato'valambaṁ*
*svapātahetoḥ śiśuvanmumukṣuḥ // **337**//*

देहादिसंसक्तिमतो न मुक्तिः

मुक्तस्य देहाद्यभिमत्यभावः ।

सुप्तस्य नो जागरणं न जाग्रतः

स्वप्नस्तयोर्भिन्नगुणाश्रयत्वात् ॥ **३३८** ॥

*dehādisaṁsaktimato na muktiḥ*
*muktasya dehādyabhimatyabhāvaḥ /*
*suptasya no jāgaraṇaṁ na jāgrataḥ*
*svapnastayorbhinnaguṇāśrayatvāt // **338**//*

अन्तर्बहिः स्वं स्थिरजङ्गमेषु

ज्ञात्वाऽऽत्मनाधारतया विलोक्य ।

त्यक्ताखिलोपाधिरखण्डरूपः

पूर्णात्मना यः स्थित एष मुक्तः ॥ ३३९ ॥

*antarbahiḥ svaṁ sthirajaṅgameṣu*
*jñātvā''tmanādhāratayā vilokya /*
*tyaktākhilopādhirakhaṇḍarūpaḥ*
*pūrṇātmanā yaḥ sthita eṣa muktaḥ // 339//*

सर्वात्मता बन्धविमुक्तिहेतुः सर्वात्मभावान्न परोऽस्ति कश्चित् ।

दृश्याग्रहे सत्युपपद्यतेऽसौ सर्वात्मभावोऽस्य सदात्मनिष्ठया ॥ ३४० ॥

*sarvātmatā bandhavimuktihetuḥ*
*sarvātmabhāvānna paro'sti kaścit /*
*dṛśyāgrahe satyupapadyate'sau*
*sarvātmabhāvo'sya sadātmaniṣṭhayā // 340//*

दृश्यस्याग्रहणं कथं नु घटते देहात्मना तिष्ठतो

बाह्यार्थानुभवप्रसक्तमनसस्तत्तत्क्रियां कुर्वतः ।

संन्यस्ताखिलधर्मकर्मविषयैर्नित्यात्मनिष्ठापरैः

तत्त्वज्ञैः करणीयमात्मनि सदानन्देच्छुभिर्यत्नतः ॥ ३४१ ॥

*dṛśyasyāgrahaṇaṁ kathaṁ nu ghaṭate dehātmanā tiṣṭhato*
*bāhyārthānubhavaprasaktamanasastattatkriyāṁ kurvataḥ /*
*sannyastākhiladharmakarmaviṣayairnityātmaniṣṭhāparaiḥ*
*tattvajñaiḥ karaṇīyamātmani sadānandecchubhiryatnataḥ // 341//*

सर्वात्मसिद्धये भिक्षोः कृतश्रवणकर्मणः।
समाधिं विदधात्येषा शान्तो दान्त इति श्रुतिः॥ **३४२**॥
*sarvātmasiddhaye bhikṣoḥ kṛtaśravaṇakarmaṇaḥ |*
*samādhiṁ vidadhātyeṣā śānto dānta iti śrutiḥ || **342**||*

आरूढशक्तेरहमो विनाशः कर्तुन्न शक्य सहसापि पण्डितैः।
ये निर्विकल्पाख्यसमाधिनिश्चलाः तानन्तराऽनन्तभवा हि वासनाः॥ **३४३**॥
*ārūḍhaśakterahamo vināśaḥ kartunna śakya sahasāpi paṇḍitaiḥ |*
*ye nirvikalpākhyasamādhiniścalāḥ*
*tānantarā'nantabhavā hi vāsanāḥ || **343**||*

अहंबुद्ध्यैव मोहिन्या योजयित्वाऽऽवृतेर्बलात्।
विक्षेपशक्तिः पुरुषं विक्षेपयति तद्गुणैः॥ **३४४**॥
*ahambuddhyaiva mohinyā yojayitvā''vṛterbalāt |*
*vikṣepaśaktiḥ puruṣaṁ vikṣepayati tadguṇaiḥ || **344**||*

विक्षेपशक्तिविजयो विषमो विधातुं निःशेषमावरणशक्तिनिवृत्त्यभावे।
दृग्दृश्ययोः स्फुटपयोजलवद्विभागे नश्येत्तदावरणमात्मनि च स्वभावात्।
निःसंशयेन भवति प्रतिबन्धशून्यो विक्षेपणं नहिं तदा यदि चेन्मृषार्थे॥ **३४५**॥
*vikṣepaśaktivijayo viṣamo vidhātuṁ*
*niḥśeṣamāvaraṇaśaktinivṛttyabhāve |*
*dṛgdṛśyayoḥ sphuṭapayojalavadvibhāge naśyettadāvaraṇamātmani*
*ca svabhāvāt | niḥsaṁśayena bhavati pratibandhaśūnyo*
*vikṣepaṇaṁ nahiṁ tadā yadi cenmṛṣārthe || **345**||*

सम्यग्विवेकः स्फुटबोधजन्यो विभज्य दृग्दृश्यपदार्थतत्त्वम्।
छिनत्ति मायाकृतमोहबन्धं यस्माद्विमुक्तस्तु पुनर्न संसृतिः॥ **३४६**॥

*samyagvivekaḥ sphuṭabodhajanyo*
*vibhajya dṛgdṛśyapadārthatattvam /*
*chinatti māyākṛtamohabandhaṁ*
*yasmādvimuktastu punarna saṁsṛtiḥ // **346**//*

परावरैकत्वविवेकवह्निः दहत्यविद्यागहनं ह्यशेषम्।
किं स्यात्पुनः संसरणस्य बीजं अद्वैतभावं समुपेयुषोऽस्य॥ **३४७**॥

*parāvaraikatvavivekavahniḥ*
*dahatyavidyāgahanaṁ hyaśeṣam /*
*kiṁ syātpunaḥ saṁsaraṇasya bījaṁ*
*advaitabhāvaṁ samupeyuṣo'sya // **347**//*

आवरणस्य निवृत्तिर्भवति हि सम्यकखेपदार्थदर्शनतः।
मिथ्याज्ञानविनाशस्तद्विक्षेपजनितदुःखनिवृत्तिः॥ **३४८**॥

*āvaraṇasya nivṛttirbhavati hi samyakpadārthadarśanataḥ /*
*mithyājñānavināśastadvikṣepajanitaduḥkhanivṛttiḥ // **348**//*

एतत्त्रितयं दृष्टं सम्यग्रज्जुस्वरूपविज्ञानात्।
तस्माद्वस्तुसतत्त्वं ज्ञातव्यं बन्धमुक्तये विदुषा॥ **३४९**॥

*etattritayaṁ dṛṣṭaṁ samyagrajjusvarūpavijñānāt /*
*tasmādvastusatattvaṁ jñātavyaṁ bandhamuktaye viduṣā // **349**//*

अयोऽग्नियोगादिव सत्समन्वयान् मात्रादिरूपेण विजृम्भते धीः ।

तत्कार्यमेतद्द्वितयं यतो मृषा दृष्टं भ्रमस्वप्नमनोरथेषु ॥ ३५० ॥

*ayo'gniyogādiva satsamanvayān mātrādirūpeṇa vijṛmbhate dhīḥ |*
*tatkāryametaddvitayaṁ yato mṛṣā*
*dṛṣṭaṁ bhramasvapnamanorathesu || **350**||*

ततो विकाराः प्रकृतेरहंमुखा देहावसाना विषयाश्च सर्वे ।

क्षणेऽन्यथाभावितया ह्यमीषा-मसत्त्वमात्मा तु कदापि नान्यथा ॥ ३५१ ॥

*tato vikārāḥ prakṛterahammukhā dehāvasānā viṣayāśca sarve |*
*kṣaṇe'nyathābhāvitayā hyamīṣā-*
*masattvamātmā tu kadāpi nānyathā || **351**||*

नित्याद्वयाखण्डचिदेकरूपो बुद्ध्यादिसाक्षी सदसद्विलक्षणः ।

अहंपदप्रत्ययलक्षितार्थः प्रत्यक्सदानन्दघनः परात्मा ॥ ३५२ ॥

*nityādvayākhaṇḍacidekarūpo buddhyādisākṣī sadasadvilakṣaṇaḥ |*
*ahampadapratyayalakṣitārthaḥ*
*pratyak sadānandaghanaḥ parātmā || **352**||*

इत्थं विपश्चित्सदसद्विभज्य निश्चित्य तत्त्वं निजबोधदृष्ट्या ।

ज्ञात्वा स्वमात्मानमखण्डबोधं तेभ्यो विमुक्तः स्वयमेव शाम्यति ॥ ३५३ ॥

*itthaṁ vipaścitsadasadvibhajya*
*niścitya tattvaṁ nijabodhadṛṣṭyā |*
*jñātvā svamātmānamakhaṇḍabodhaṁ*
*tebhyo vimuktaḥ svayameva śāmyati || **353**||*

अज्ञानहृदयग्रन्थेर्निःशेषविलयस्तदा ।

समाधिनाऽविकल्पेन यदाऽद्वैतात्मदर्शनम् ॥ **३५४** ॥

*ajñānahṛdayagrantherniḥśeṣavilayastadā |*
*samādhinā'vikalpena yadā'dvaitātmadarśanam || **354**||*

त्वमहमिदमितीयं कल्पना बुद्धिदोषात् प्रभवति परमात्मन्यद्वये निर्विशेषे ।

प्रविलसति समाधावस्य सर्वो विकल्पो विलयनमुपगच्छेद्वस्तुतत्त्वावधृत्या ॥ **३५५** ॥

*tvamahamidamitīyaṁ kalpanā buddhidoṣāt*
*prabhavati paramātmanyadvaye nirviśeṣe |*
*pravilasati samādhāvasya sarvo vikalpo*
*vilayanamupagacchedvastutattvāvadhṛtyā || **355**||*

शान्तो दान्तः परमुपरतः क्षान्तियुक्तः समाधिं

कुर्वन्नित्यं कलयति यतिः स्वस्य सर्वात्मभावम् ।

तेनाविद्यातिमिरजनितान्साधु दग्ध्वा विकल्पान्

ब्रह्माकृत्या निवसति सुखं निष्क्रियो निर्विकल्पः ॥ **३५६** ॥

*śānto dāntaḥ paramuparataḥ kṣāntiyuktaḥ samādhiṁ*
*kurvannityaṁ kalayati yatiḥ svasya sarvātmabhāvam |*
*tenāvidyātimirajanitānsādhu dagdhvā vikalpān*
*brahmākṛtyā nivasati sukhaṁ niṣkriyo nirvikalpaḥ || **356**||*

समाहिता ये प्रविलाप्य बाह्यं श्रोत्रादि चेतः स्वमहं चिदात्मनि ।

त एव मुक्ता भवपाशबन्धैः नान्ये तु पारोक्ष्यकथाभिधायिनः ॥ **३५७** ॥

*samāhitā ye pravilāpya bāhyaṁ*
*śrotrādi cetaḥ svamahaṁ cidātmani |*
*ta eva muktā bhavapāśabandhaiḥ*
*nānye tu pārokṣyakathābhidhāyinaḥ || **357**||*

उपाधिभेदात्स्वयमेव भिद्यते चोपाध्यपोहे स्वयमेव केवलः।
तस्मादुपाधेर्विलयाय विद्वान् वसेत्सदाऽकल्पसमाधिनिष्ठया॥ **३५८**॥

*upādhibhedātsvayameva bhidyate*
*copādhyapohe svayameva kevalaḥ |*
*tasmādupādhervilayāya vidvān*
*vasetsadā'kalpasamādhiniṣṭhayā || **358**||*

सति सक्तो नरो याति सद्भावं ह्येकनिष्ठया।
कीटको भ्रमरं ध्यायन् भ्रमरत्वाय कल्पते॥ **३५९**॥

*sati sakto naro yāti sadbhāvaṁ hyekaniṣṭhayā |*
*kīṭako bhramaraṁ dhyāyan bhramaratvāya kalpate || **359**||*

क्रियान्तरासक्तिमपास्य कीटको ध्यायन्नलित्वं ह्यलिभावमृच्छति।
तथैव योगी परमात्मतत्त्वं ध्यात्वा समायाति तदेकनिष्ठया॥ **३६०**॥

*kriyāntarāsaktimapāsya kīṭako*
*dhyāyannalitvaṁ hyalibhāvamṛcchati |*
*tathaiva yogī paramātmatattvaṁ*
*dhyātvā samāyāti tadekaniṣṭhayā || **360**||*

अतीव सूक्ष्मं परमात्मतत्त्वं न स्थूलदृष्ट्या प्रतिपत्तुमर्हति ।

समाधिनात्यन्तसुसूक्ष्मवृत्या ज्ञातव्यमार्यैरतिशुद्धबुद्धिभिः ॥ ३६१ ॥

*atīva sūkṣmaṁ paramātmatattvaṁ*
*na sthūladṛṣṭyā pratipattumarhati |*
*samādhinātyantasusūkṣmavṛtyā*
*jñātavyamāryairatiśuddhabuddhibhiḥ || **361**||*

यथा सुवर्णं पुटपाकशोधितं त्यक्त्वा मलं स्वात्मगुणं समृच्छति ।

तथा मनः सत्त्वरजस्तमोमलं ध्यानेन सन्त्यज्य समेति तत्त्वम् ॥ ३६२ ॥

*yathā suvarṇaṁ puṭapākaśodhitaṁ*
*tyaktvā malaṁ svātmaguṇaṁ samṛcchati |*
*tathā manaḥ sattvarajastamomalaṁ*
*dhyānena santyajya sameti tattvam || **362**||*

निरन्तराभ्यासवशात्तदित्थं पक्वं मनो ब्रह्मणि लीयते यदा ।

तदा समाधिः सविकल्पवर्जितः स्वतोऽद्वयानन्दरसानुभावकः ॥ ३६३ ॥

*nirantarābhyāsavaśāttaditthaṁ*
*pakvaṁ mano brahmaṇi līyate yadā |*
*tadā samādhiḥ savikalpavarjitaḥ*
*svato'dvayānandarasānubhāvakaḥ || **363**||*

समाधिनाऽनेन समस्तवासना-ग्रन्थेर्विनाशोऽखिलकर्मनाशः ।

अन्तर्बहिः सर्वत एव सर्वदा

स्वरूपविस्फूर्तिरयत्नतः स्यात् ॥ ३६४ ॥

*samādhinā'nena samastavāsanā-granthervināśo'khilakarmanāśaḥ |*
*antarbahiḥ sarvata eva sarvadā*
*svarūpavisphūrtirayatnataḥ syāt ||* ***364****||*

श्रुतेः शतगुणं विद्यान्मननं मननादपि ।
निदिध्यासं लक्षगुणमनन्तं निर्विकल्पकम् ॥ **३६५** ॥

*śruteḥ śataguṇaṁ vidyānmananaṁ mananādapi |*
*nidindhyāsaṁ lakṣaguṇamanantaṁ nirvikalpakam ||* ***365****||*

निर्विकल्पकसमाधिना स्फुटं ब्रह्मतत्त्वमवगम्यते ध्रुवम् ।
नान्यथा चलतया मनोगतेः प्रत्ययान्तरविमिश्रितं भवेत् ॥ **३६६** ॥

*nirvikalpakasamādhinā sphuṭaṁ*
*brahmatattvamavagamyate dhruvam |*
*nānyathā calatayā manogateḥ*
*pratyayāntaravimiśritaṁ bhavet ||* ***366****||*

अतः समाधत्स्व यतेन्द्रियः सन्
निरन्तरं शान्तमनाः प्रतीचि ।
विध्वंसय ध्वान्तमनाद्यविद्यया
कृतं सदेकत्वविलोकनेन ॥ **३६७** ॥

*ataḥ samādhatsva yatendriyaḥ san*
*nirantaraṁ śāntamanāḥ pratīci |*
*vidhvaṁsaya dhvāntamanādyavidyayā*
*kṛtaṁ sadekatvavilokanena ||* ***367****||*

योगस्य प्रथमद्वारं वाङ्खेनिरोधोऽपरिग्रहः ।
निराशा च निरीहा च नित्यमेकान्तशीलता ॥ ३६८ ॥

*yogasya prathamadvāraṁ vāṅnirodho'parigrahaḥ |*
*nirāśā ca nirīhā ca nityamekāntaśīlatā || 368||*

एकान्तस्थितिरिन्द्रियोपरमणे हेनुर्दमश्चेतसः
संरोधे करणं शमेन विलयं यायादहंवासना ।
तेनानन्दरसानुभूतिरचला ब्राह्मी सदा योगिनः
तस्माच्चित्तनिरोध एव सततं कार्यः प्रयत्नो मुनेः ॥ ३६९ ॥

*ekāntasthitirindriyoparamaṇe henurdamaścetasaḥ*
*saṁrodhe karaṇaṁ śamena vilayaṁ yāyādahaṁvāsanā |*
*tenānandarasānubhūtiracalā brāhmī sadā yoginaḥ*
*tasmāccittanirodha eva satataṁ*
*kāryaḥ prayatno muneḥ || 369||*

वाचं नियच्छात्मनि तं नियच्छ
बुद्धौ धियं यच्छ च बुद्धिसाक्षिणि ।
तं चापि पूर्णात्मनि निर्विकल्पे
विलाप्य शान्तिं परमां भजस्व ॥ ३७० ॥

*vācaṁ niyacchātmani taṁ niyaccha*
*buddhau dhiyaṁ yaccha ca buddhisākṣiṇi |*
*taṁ cāpi pūrṇātmani nirvikalpe*
*vilāpya śāntiṁ paramāṁ bhajasva || 370||*

देहप्राणेन्द्रियमनोबुद्ध्यादिभिरुपाधिभिः।
यैर्यैर्वृत्तेःसमायोगस्तत्तद्भावोऽस्य योगिनः॥ **३७१**॥

*dehaprāṇendriyamanobuddhyādibhirupādhibhiḥ /*
*yairyairvṛtteḥsamāyogastatadbhāvo'sya yoginaḥ // **371**//*

तन्निवृत्त्या मुनेः सम्यकखे सर्वोपरमणं सुखम्।
संदृश्यते सदानन्दरसानुभवविप्लवः॥ **३७२**॥

*tannivṛttyā muneḥ samyak sarvoparamaṇaṁ sukham /*
*sandṛśyate sadānandarasānubhavaviplavaḥ // **372**//*

अन्तस्त्यागो बहिस्त्यागो विरक्तस्यैव युज्यते।
त्यजत्यन्तर्बहिःसङ्गं विरक्तस्तु मुमुक्षया॥ **३७३**॥

*antastyāgo bahistyāgo viraktasyaiva yujyate /*
*tyajatyantarbahiḥsaṅgaṁ viraktastu mumukṣayā // **373**//*

बहिस्तु विषयैः सङ्गं तथान्तरहमादिभिः।
विरक्त एव शक्नोति त्यक्तुं ब्रह्मणि निष्ठितः॥ **३७४**॥

*bahistu viṣayaiḥ saṅgaṁ tathāntarahamādibhiḥ /*
*virakta eva śaknoti tyaktuṁ brahmaṇi niṣṭhitaḥ // **374**//*

वैराग्यबोधौ पुरुषस्य पक्षिवत् पक्षौ विजानीहि विचक्षण त्वम्।
विमुक्तिसौधाग्रलताधिरोहणं
ताभ्यां विना नान्यतरेण सिध्यति॥ **३७५**॥

*vairāgyabodhau puruṣasya pakṣivat*
*pakṣau vijānīhi vicakṣaṇa tvam |*
*vimuktisaudhāgralatādhirohaṇaṁ*
*tābhyāṁ vinā nānyatareṇa sidhyati || **375**||*

अत्यन्तवैराग्यवतः समाधिः
समाहितस्यैव दृढप्रबोधः ।
प्रबुद्धतत्त्वस्य हि बन्धमुक्तिः
मुक्तात्मनो नित्यसुखानुभूतिः ॥ **३७६** ॥

*atyantavairāgyavataḥ samādhiḥ*
*samāhitasyaiva dṛḍhaprabodhaḥ |*
*prabuddhatattvasya hi bandhamuktiḥ*
*muktātmano nityasukhānubhūtiḥ || **376**||*

वैराग्यान्न परं सुखस्य जनकं पश्यामि वश्यात्मनः
तच्चेच्छुद्धतरात्मबोधसहितं स्वाराज्यसाम्राज्यधुक्खे ।
एतदखेद्वारमजस्रमुक्तियुवतेर्यस्मात्त्वमस्मात्परं
सर्वत्रास्पृहया सदात्मनि सदा प्रज्ञां कुरु श्रेयसे ॥ **३७७** ॥

*vairāgyānna paraṁ sukhasya janakaṁ paśyāmi vaśyātmanaḥ*
*taccecchuddhatarātmabodhasahitaṁ svārājyasāmrājyadhuk |*
*etaddvāramajasramuktiyuvateryasmāttvamasmātparaṁ*
*sarvatrāspṛhayā sadātmani sadā prajñāṁ kuru śreyase || **377**||*

आशां छिन्द्धि विषोपमेषु विषयेष्वेषैव मृत्योः कृति-
स्त्यक्त्वा जातिकुलाश्रमेष्वभिमतिं मुञ्चातिदूरात्क्रियाः ।
देहादावसति त्यजात्मधिषणां प्रज्ञां कुरुष्वात्मनि
त्वं द्रष्टास्यमनोऽसि निर्द्वयपरं ब्रह्मासि यद्वस्तुतः ॥ ३७८ ॥

*āśāṁ chinddhi viṣopameṣu viṣayeṣveṣaiva mṛtyoḥ kṛti-*
*styaktvā jātikulāśrameṣvabhimatiṁ muñcātidūrātkriyāḥ |*
*dehādāvasati tyajātmadhiṣaṇāṁ prajñāṁ kuruṣvātmani*
*tvaṁ draṣṭāsyamano'si nirdvayaparaṁ*
*brahmāsi yadvastutaḥ || 378||*

लक्ष्ये ब्रह्मणि मानसं दृढतरं संस्थाप्य बाह्येन्द्रियं
स्वस्थाने विनिवेश्य निश्चलतनुश्चोपेक्ष्य देहस्थितिम् ।
ब्रह्मात्मैक्यमुपेत्य तन्मयतया चाखण्डवृत्त्याऽनिशं
ब्रह्मानन्दरसं पिबात्मनि मुदा शून्यैः किमन्यैर्भृशम् ॥ ३७९ ॥

*lakṣye brahmaṇi mānasaṁ dṛḍhataraṁ saṁsthāpya bāhyendriyaṁ*
*svasthāne viniveśya niścalatanuścopekṣya dehasthitim |*
*brahmātmaikyamupetya tanmayatayā cākhaṇḍavṛttyā'niśaṁ*
*brahmānandarasaṁ pibātmani mudā*
*śūnyaiḥ kimanyairbhṛśam || 379||*

अनात्मचिन्तनं त्यक्त्वा कश्मलं दुःखकारणम् ।
चिन्तयात्मानमानन्दरूपं यन्मुक्तिकारणम् ॥ ३८० ॥

*anātmacintanaṁ tyaktvā kaśmalaṁ duḥkhakāraṇam |*
*cintayātmānamānandarūpaṁ yanmuktikāraṇam || 380||*

एष स्वयंज्योतिरशेषसाक्षी विज्ञानकोशो विलसत्यजस्रम् ।
लक्ष्यं विधायैनमसद्विलक्षण-मखण्डवृत्त्याऽऽत्मतयाऽनुभावय ॥ ३८१ ॥

*eṣa svayañjyotiraśeṣasākṣī*
*vijñānakośo vilasatyajasram /*
*lakṣyaṁ vidhāyainamasadvilakṣaṇa-*
*makhaṇḍavṛttyā''tmatayā'nubhāvaya // **381**//*

एतमच्छीन्नया वृत्त्या प्रत्ययान्तरशून्यया ।
उल्लेखयन्विजानीयात्स्वस्वरूपतया स्फुटम् ॥ ३८२ ॥

*etamacchīnnayā vṛttyā pratyayāntaraśūnyayā /*
*ullekhayanvijānīyātsvasvarūpatayā sphuṭam // **382**//*

अत्रात्मत्वं दृढीकुर्वन्नहमादिषु संत्यजन् ।
उदासीनतया तेषु तिष्ठेत्स्फुटघटादिवत् ॥ ३८३ ॥

*atrātmatvaṁ dṛḍhīkurvannahamādiṣu santyajan /*
*udāsīnatayā teṣu tiṣṭhetsphuṭaghaṭādivat // **383**//*

विशुद्धमन्तःकरणं स्वरूपे निवेश्य साक्षिण्यवबोधमात्रे ।
शनैः शनैर्निश्चलतामुपानयन् पूर्णं स्वमेवानुविलोकयेत्ततः ॥ ३८४ ॥

*viśuddhamantaḥkaraṇaṁ svarūpe*
*niveśya sākṣiṇyavabodhamātre /*
*śanaiḥ śanairniścalatāmupānayan*
*pūrṇaṁ svamevānuvilokayettataḥ // **384**//*

देहेन्द्रियप्राणमनोऽहमादिभिः स्वाज्ञानक्लृप्तैरखिलैरुपाधिभिः ।
विमुक्तमात्मानमखण्डरूपं पूर्णं महाकाशमिवावलोकयेत् ॥ ३८५ ॥

*dehendriyaprāṇamano'hamādibhiḥ*
*svājñānaklṛptairakhilairupādhibhiḥ |*
*vimuktamātmānamakhaṇḍarūpaṁ*
*pūrṇaṁ mahākāśamivāvalokayet || **385**||*

घटकलशकुसूलसूचिमुख्यैः गगनमुपाधिशतैर्विमुक्तमेकम् ।
भवति न विविधं तथैव शुद्धं परमहमादिविमुक्तमेकमेव ॥ ३८६ ॥

*ghaṭakalaśakusūlasūcimukhyaiḥ*
*gaganamupādhiśatairvimuktamekam |*
*bhavati na vividhaṁ tathaiva śuddhaṁ*
*paramahamādivimuktamekameva || **386**||*

ब्रह्मादिस्तम्बपर्यन्ता मृषामात्रा उपाधयः ।
ततः पूर्णं स्वमात्मानं पश्येदेकात्मना स्थितम् ॥ ३८७ ॥

*brahmādistambaparyantā mṛṣāmātrā upādhayaḥ |*
*tataḥ pūrṇaṁ svamātmānaṁ paśyedekātmanā sthitam || **387**||*

यत्र भ्रान्त्या कल्पितं तद्विवेके तत्तन्मात्रं नैव तस्माद्विभिन्नम् ।
भ्रान्तेर्नाशे भाति दृष्टाहितत्त्वं रज्जुस्तद्वद्विश्वमात्मस्वरूपम् ॥ ३८८ ॥

*yatra bhrāntyā kalpitaṁ tadviveke*
*tattanmātraṁ naiva tasmādvibhinnam |*
*bhrānternāśe bhāti dṛṣṭāhitattvaṁ*
*rajjustadvadviśvamātmasvarūpam || **388**||*

स्वयं ब्रह्मा स्वयं विष्णुः स्वयमिन्द्रः स्वयं शिवः।
स्वयं विश्वमिदं सर्वं स्वस्मादन्यन्न किञ्चन॥ ३८९॥

*svayaṁ brahmā svayaṁ viṣṇuḥ svayamindraḥ svayaṁ śivaḥ /*
*svayaṁ viśvamidaṁ sarvaṁ svasmādanyanna kiñcana // **389**//*

अन्तः स्वयं चापि बहिः स्वयं च
स्वयं पुरस्तात् स्वयमेव पश्चात्।
स्वयं ह्यावाच्यां स्वयमप्युदीच्यां
तथोपरिष्टात्स्वयमप्यधस्तात्॥ ३९०॥

*antaḥ svayaṁ cāpi bahiḥ svayaṁ ca*
*svayaṁ purastāt svayameva paścāt /*
*svayaṁ hyāvācyāṁ svayamapyudīcyāṁ*
*tathopariṣṭātsvayamapyadhastāt // **390**//*

तरङ्गफेनभ्रमबुद्बुदादि
सर्वं स्वरूपेण जलं यथा तथा।
चिदेव देहाद्यहमन्तमेतत्
सर्वं चिदेवैकरसं विशुद्धम्॥ ३९१॥

*taraṅgaphenabhramabudbudādi*
*sarvaṁ svarūpeṇa jalaṁ yathā tathā /*
*cideva dehādyahamantametat*
*sarvaṁ cidevaikarasaṁ viśuddham // **391**//*

सदेवेदं सर्वं जगदवगतं वाङ्मनसयोः
सतोऽन्यन्नास्त्येव प्रकृतिपरसीम्नि स्थितवतः ।
पृथक्किं मृत्स्नायाः कलशघटकुम्भाद्यवगतं
वदत्येष भ्रान्तस्त्वमहमिति मायामदिरया ॥ ३९२ ॥

*sadevedaṁ sarvaṁ jagadavagataṁ vāṅmanasayoḥ*
*sato'nyannāstyeva prakṛtiparasīmni sthitavataḥ* /
*pṛthak kiṁ mṛtsnāyāḥ kalaśaghaṭakumbhādyavagataṁ*
*vadatyeṣa bhrāntastvamahamiti māyāmadirayā* // ***392***//

क्रियासमभिहारेण यत्र नान्यदिति श्रुतिः ।
ब्रवीति द्वैतराहित्यं मिथ्याध्यासनिवृत्तये ॥ ३९३ ॥

*kriyāsamabhihāreṇa yatra nānyaditi śrutiḥ* /
*bravīti dvaitarāhityaṁ mithyādhyāsanivṛttaye* // ***393***//

आकाशवन्निर्मलनिर्विकल्पं
निःसीमनिःस्पन्दननिर्विकारम् ।
अन्तर्बहिःशून्यमनन्यमद्वयं
स्वयं परं ब्रह्म किमस्ति बोध्यम् ॥ ३९४ ॥

*ākāśavannirmalanirvikalpaṁ*
*niḥsīmaniḥspandananirvikāram* /
*antarbahiḥśūnyamananyamadvayaṁ*
*svayaṁ paraṁ brahma kimasti bodhyam* // ***394***//

वक्तव्यं किमु विद्यतेऽत्र बहुधा ब्रह्मैव जीवः स्वयं

ब्रह्मैतज्जगदाततं नु सकलं ब्रह्माद्वितीयं श्रुतिः ।

ब्रह्मैवाहमिति प्रबुद्धमतयः संत्यक्तबाह्याः स्फुटं

ब्रह्मीभूय वसन्ति सन्ततचिदानन्दात्मनैतद्ध्रुवम् ॥ **३९५** ॥

*vaktavyaṁ kimu vidyate'tra bahudhā brahmaiva jīvaḥ svayaṁ*
*brahmaitajjagadātataṁ nu sakalaṁ brahmādvitīyaṁ śrutiḥ |*
*brahmaivāhamiti prabuddhamatayaḥ santyaktabāhyāḥ sphuṭaṁ*
*brahmībhūya vasanti*
*santatacidānandātmanaitaddhruvam || **395**||*

जहि मलमयकोशेऽहंधियोत्थापिताशां प्रसभमनिलकल्पे लिङ्गदेहेऽपि पश्चात् ।

निगमगदितकीर्तिं नित्यमानन्दमूर्तिं स्वयमिति परिचीय ब्रह्मरूपेण तिष्ठ ॥ **३९६** ॥

*jahi malamayakośe'handhiyotthāpitāśāṁ*
*prasabhamanilakalpe liṅgadehe'pi paścāt |*
*nigamagaditakīrtiṁ nityamānandamūrtiṁ*
*svayamiti paricīya brahmarūpeṇa tiṣṭha || **396**||*

शवाकारं यावद्भजति मनुजस्तावदशुचिः परेभ्यः स्यात्क्लेशो जननमरणव्याधिनिलयः ।

यदात्मानं शुद्धं कलयति शिवाकारमचलम्

तदा तेभ्यो मुक्तो भवति हि तदाह श्रुतिरपि ॥ **३९७** ॥

*śavākāraṁ yāvadbhajati manujastāvadaśuciḥ*
*parebhyaḥ syātkleśo jananamaraṇavyādhinilayaḥ |*
*yadātmānaṁ śuddhaṁ kalayati śivākāramacalam*
*tadā tebhyo mukto bhavati hi tadāha śrutirapi || **397**||*

स्वात्मन्यारोपिताशेषाभासवस्तुनिरासतः ।
स्वयमेव परं ब्रह्म पूर्णमद्वयमक्रियम् ॥ ३९८ ॥

*svātmanyāropitāśeṣābhāsarvastunirāsataḥ |*
*svayameva paraṁ brahma pūrṇamadvayamakriyam ||* ***398****||*

समाहितायां सति चित्तवृत्तौ
परात्मनि ब्रह्मणि निर्विकल्पे ।
न दृश्यते कश्चिदयं विकल्पः
प्रजल्पमात्रः परिशिष्यते यतः ॥ ३९९ ॥

*samāhitāyāṁ sati cittavṛttau*
*parātmani brahmaṇi nirvikalpe |*
*na dṛśyate kaścidayaṁ vikalpaḥ*
*prajalpamātraḥ pariśiṣyate yataḥ ||* ***399****||*

असत्कल्पो विकल्पोऽयं विश्वमित्येकवस्तुनि ।
निर्विकारे निराकारे निर्विशेषे भिदा कुतः ॥ ४०० ॥

*asatkalpo vikalpo'yaṁ viśvamityekavastuni |*
*nirvikāre nirākāre nirviśeṣe bhidā kutaḥ ||* ***400****||*

द्रष्टुदर्शनदृश्यादिभावशून्यैकवस्तुनि ।
निर्विकारे निराकारे निर्विशेषे भिदा कुतः ॥ ४०१ ॥

*draṣṭudarśanadṛśyādibhāvaśūnyaikavastuni |*
*nirvikāre nirākāre nirviśeṣe bhidā kutaḥ ||* ***401****||*

कल्पार्णव इवात्यन्तपरिपूर्णैकवस्तुनि ।
निर्विकारे निराकारे निर्विशेषे भिदा कुतः ॥ ४०२ ॥

*kalpārṇava ivātyantaparipūrṇaikavastuni |*
*nirvikāre nirākāre nirviśeṣe bhidā kutaḥ ||* 402*||*

तेजसीव तमो यत्र प्रलीनं भ्रान्तिकारणम् ।
अद्वितीये परे तत्त्वे निर्विशेषे भिदा कुतः ॥ ४०३ ॥

*tejasīva tamo yatra pralīnaṁ bhrāntikāraṇam |*
*advitīye pare tattve nirviśeṣe bhidā kutaḥ ||* 403*||*

एकात्मके परे तत्त्वे भेदवार्ता कथं वसेत् ।
सुषुप्तौ सुखमात्रायां भेदः केनावलोकितः ॥ ४०४ ॥

*ekātmake pare tattve bhedavārtā kathaṁ vaset |*
*suṣuptau sukhamātrāyāṁ bhedaḥ kenāvalokitaḥ ||* 404*||*

न ह्यस्ति विश्वं परतत्त्वबोधात्
सदात्मनि ब्रह्मणि निर्विकल्पे ।
कालत्रये नाप्यहिरीक्षितो गुणे
न ह्यम्बुबिन्दुर्मृगतृष्णिकायाम् ॥ ४०५ ॥

*na hyasti viśvaṁ paratattvabodhāt*
*sadātmani brahmaṇi nirvikalpe |*
*kālatraye nāpyahirīkṣito guṇe*
*na hyambubindurmṛgatṛṣṇikāyām ||* 405*||*

मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ।

इति ब्रूते श्रुतिः साक्षात्सुषुप्तावनुभूयते ॥ ४०६ ॥

*māyāmātramidaṁ dvaitamadvaitaṁ paramārthataḥ /*
*iti brūte śrutiḥ sākṣātsuṣuptāvanubhūyate // 406//*

अनन्यत्वमधिष्ठानादारोप्यस्य निरीक्षितम् ।

पण्डितै रज्जुसर्पादौ विकल्पो भ्रान्तिजीवनः ॥ ४०७ ॥

*ananyatvamadhiṣṭhānādāropyasya nirīkṣitam /*
*paṇḍitai rajjusarpādau vikalpo bhrāntijīvanaḥ // 407//*

चित्तमूलो विकल्पोऽयं चित्ताभावे न कश्चन ।

अतश्चित्तं समाधेहि प्रत्यग्रूपे परात्मनि ॥ ४०८ ॥

*cittamūlo vikalpo'yaṁ cittābhāve na kaścana /*
*ataścittaṁ samādhehi pratyagrūpe parātmani // 408//*

किमपि सततबोधं केवलानन्दरूपं

निरुपममतिवेलं नित्यमुक्तं निरीहम् ।

निरवधिगगनाभं निष्कलं निर्विकल्पं

हृदि कलयति विद्वान् ब्रह्म पूर्णं समाधौ ॥ ४०९ ॥

*kimapi satatabodhaṁ kevalānandarūpaṁ*
*nirupamamativelaṁ nityamuktaṁ nirīham /*
*niravadhigaganābhaṁ niṣkalaṁ nirvikalpaṁ*
*hṛdi kalayati vidvān brahma pūrṇaṁ samādhau // 409//*

प्रकृतिविकृतिशून्यं भावनातीतभावं समरसमसमानं मानसम्बन्धदूरम् ।
निगमवचनसिद्धं नित्यमस्मत्प्रसिद्धं हृदि कलयति विद्वान् ब्रह्म पूर्णं समाधौ ॥ ४१० ॥

*prakṛtivikṛtiśūnyaṁ bhāvanātītabhāvaṁ*
*samarasamasamānaṁ mānasambandhadūram /*
*nigamavacanasiddhaṁ nityamasmatprasiddhaṁ*
*hṛdi kalayati vidvān brahma pūrṇaṁ samādhau //* ***410*** *//*

अजरममरमस्ताभाववस्तुस्वरूपं स्तिमितसलिलराशिप्रख्यमाख्याविहीनम् ।
शमितगुणविकारं शाश्वतं शान्तमेकं हृदि कलयति विद्वान् ब्रह्म पूर्णं समाधौ ॥ ४११ ॥

*ajaramamaramastābhāvavastusvarūpaṁ*
*stimitasalilarāśiprakhyamākhyāvihīnam /*
*śamitaguṇavikāraṁ śāśvataṁ śāntamekaṁ*
*hṛdi kalayati vidvān brahma pūrṇaṁ samādhau //* ***411*** *//*

समाहितान्तःकरणः स्वरूपे विलोकयात्मानमखण्डवैभवम् ।
विच्छिन्द्धि बन्धं भवगन्धगन्धितं यत्नेन पुंस्त्वं सफलीकुरुष्व ॥ ४१२ ॥

*samāhitāntaḥkaraṇaḥ svarūpe*
*vilokayātmānamakhaṇḍavaibhavam /*
*vicchinddhi bandhaṁ bhavagandhagandhitaṁ*
*yatnena puṁstvaṁ saphalīkuruṣva //* ***412*** *//*

सर्वोपाधिविनिर्मुक्तं सच्चिदानन्दमद्वयम् ।
भावयात्मानमात्मस्थं न भूयः कल्पसेऽध्वने ॥ ४१३ ॥

*sarvopādhivinirmuktaṁ saccidānandamadvayam /*
*bhāvayātmānamātmasthaṁ na bhūyaḥ kalpase'dhvane //* ***413*** *//*

छायेव पुंसः परिदृश्यमान माभासरूपेण फलानुभूत्या ।

शरीरमाराच्छववन्निरस्तं पुनर्न संधत्त इदं महात्मा ॥ **४१४** ॥

*chāyeva puṁsaḥ paridṛśyamāna-mābhāsarūpeṇa phalānubhūtyā |*
*śarīramārācchavavannirastaṁ*
*punarna sandhatta idaṁ mahātmā || **414**||*

सततविमलबोधानन्दरूपं समेत्य त्यज जडमलरूपोपाधिमेतं सुदूरे ।

अथ पुनरपि नैष स्मर्यतां वान्तवस्तु स्मरणविषयभूतं पल्पते कुत्सनाय ॥ **४१५** ॥

*satatavimalabodhānandarūpaṁ sametya*
*tyaja jaḍamalarūpopādhimetaṁ sudūre |*
*atha punarapi naiṣa smaryatāṁ vāntavastu*
*smaraṇaviṣayabhūtaṁ palpate kutsanāya || **415**||*

समूलमेतत्परिदाह्य व वह्नौ सदात्मनि ब्रह्मणि निर्विकल्पे ।

ततः स्वयं नित्यविशुद्धबोधा-नन्दात्मना तिष्ठति विद्वरिष्ठः ॥ **४१६** ॥

*samūlametatparidāhya vahnau sadātmani brahmaṇi nirvikalpe |*
*tataḥ svayaṁ nityaviśuddhabodhā-*
*nandātmanā tiṣṭhati vidvariṣṭhaḥ || **416**||*

प्रारब्धसूत्रग्रथितं शरीरं प्रयातु वा तिष्ठतु गोरिव स्त्रकखे ।

न तत्पुनः पश्यति तत्त्ववेत्ताऽऽनन्दात्मनि ब्रह्मणि लीनवृत्तिः ॥ **४१७** ॥

*prārabdhasūtragrathitaṁ śarīraṁ prayātu vā tiṣṭhatu goriva srak|*
*na tatpunaḥ paśyati tattvavettā'*
*'nandātmani brahmaṇi līnavṛttiḥ || **417**||*

अखण्डानन्दमात्मानं विज्ञाय स्वस्वरूपतः।
किमिच्छन् कस्य वा हेतोर्देहं पुष्णाति तत्त्ववित्॥ ४१८॥

*akhaṇḍānandamātmānaṁ vijñāya svasvarūpataḥ /*
*kimicchan kasya vā hetordehaṁ puṣṇāti tattvavit //* ***418****//*

संसिद्धस्य फलं त्वेतज्जीवन्मुक्तस्य योगिनः।
बहिरन्तः सदानन्दरसास्वादनमात्मनि॥ ४१९॥

*saṁsiddhasya phalaṁ tvetajjīvanmuktasya yoginaḥ /*
*bahirantaḥ sadānandarasāsvādanamātmani //* ***419****//*

वैराग्यस्य फलं बोधो बोधस्योपरतिः फलम्।
स्वानन्दानुभवाच्छान्तिरेषैवोपरतेः फलम्॥ ४२०॥

*vairāgyasya phalaṁ bodho bodhasyoparatiḥ phalam /*
*svānandānubhavācchāntireṣaivoparateḥ phalam //* ***420****//*

यद्युत्तरोत्तराभावः पूर्वपूर्वन्तु निष्फलम्।
निवृत्तिः परमा तृप्तिरानन्दोऽनुपमः स्वतः॥ ४२१॥

*yadyuttarottarābhāvaḥ pūrvapūrvantu niṣphalam /*
*nivṛttiḥ paramā tṛptirānando'nupamaḥ svataḥ //* ***421****//*

दृष्टदुःखेष्वनुद्वेगो विद्यायाः प्रस्तुतं फलम्।
यत्कृतं भ्रान्तिवेलायां नाना कर्म जुगुप्सितम्।
पश्चान्नरो विवेकेन तत्कथं कर्तुमर्हति॥ ४२२॥

*dṛṣṭaduḥkheṣvanudvego vidyāyāḥ prastutaṁ phalam /*
*yatkṛtaṁ bhrāntivelāyāṁ nānā karma jugupsitam /*
*paścānnaro vivekena tatkathaṁ kartumarhati //* ***422****//*

विद्याफलं स्यादसतो निवृत्तिः
प्रवृत्तिरज्ञानफलं तदीक्षितम् ।
तज्ज्ञाज्ञयोर्यन्मृगतृष्णिकादौ
नोचेद्विदां दृष्टफलं किमस्मात् ॥ **४२३** ॥

*vidyāphalaṁ syādasato nivṛttiḥ*
*pravṛttirajñānaphalaṁ tadīkṣitam /*
*tajjñājñayoryanmṛgatṛṣṇikādau*
*nocedvidāṁ dṛṣṭaphalaṁ kimasmāt //* ***423****//*

अज्ञानहृदयग्रन्थेर्विनाशो यद्यशेषतः ।
अनिच्छोर्विषयः किं नु प्रवृत्तेः कारणं स्वतः ॥ **४२४** ॥

*ajñānahṛdayagranthervināśo yadyaśeṣataḥ /*
*anicchorviṣayaḥ kiṁ nu pravṛtteḥ kāraṇaṁ svataḥ //* ***424****//*

वासनानुदयो भोग्ये वैरागस्य तदावधिः ।
अहंभावोदयाभावो बोधस्य परमावधिः ।
लीनवृत्तैरनुत्पत्तिर्मर्यादोपरतेस्तु सा ॥ **४२५** ॥

*vāsanānudayo bhogye vairāgasya tadāvadhiḥ /*
*ahambhāvodayābhāvo bodhasya paramāvadhiḥ /*
*līnavṛttairanutpattirmaryādoparatestu sā //* ***425****//*

ब्रह्माकारतया सदा स्थिततया निर्मुक्तबाह्यार्थधी-

रन्यावेदितभोग्यभोगकलनो निद्रालुवद्बालवत् ।

स्वप्नालोकितलोकवज्जगदिदं पश्यन्क्वचिल्लब्धधी-

रास्ते कश्चिदनन्तपुण्यफलभुग्धन्यः स मान्यो भुवि ॥ ४२६ ॥

*brahmākāratayā sadā sthitatayā nirmuktabāhyārthadhī-*
*ranyāveditabhogyabhogakalano nidrāluvadbālavat |*
*svapnālokitalokavajjagadidaṁ paśyankvacillabdhadhī-*
*rāste kaścidanantapuṇyaphalabhugdhanyaḥ*
*sa mānyo bhuvi || **426**||*

स्थितप्रज्ञो यतिरयं यः सदानन्दमश्नुते ।

ब्रह्मण्येव विलीनात्मा निर्विकारो विनिष्क्रियः ॥ ४२७ ॥

*sthitaprajño yatirayaṁ yaḥ sadānandamaśnute |*
*brahmaṇyeva vilīnātmā nirvikāro viniṣkriyaḥ || **427**||*

ब्रह्मात्मनोः शोधितयोरेकभावावगाहिनी ।

निर्विकल्पा च चिन्मात्रा वृत्तिः प्रज्ञेति कथ्यते ।

सुस्थिताऽसौ भवेद्यस्य स्थितप्रज्ञः स उच्यते ॥ ४२८ ॥

*brahmātmanoḥ śodhitayorekabhāvāvagāhinī |*
*nirvikalpā ca cinmātrā vṛttiḥ prajñeti kathyate |*
*susthitā'sau bhavedyasya sthitaprajñaḥ sa ucyate || **428**||*

यस्य स्थिता भवेत्प्रज्ञा यस्यानन्दो निरन्तरः ।

प्रपञ्चो विस्मृतप्रायः स जीवन्मुक्त इष्यते ॥ ४२९ ॥

*yasya sthitā bhavetprajñā yasyānando nirantaraḥ |*
*prapañco vismṛtaprāyaḥ sa jīvanmukta iṣyate ||* ***429****||*

लीनधीरपि जागर्ति जाग्रद्धर्मविवर्जितः ।
बोधो निर्वासनो यस्य स जीवन्मुक्त इष्यते ॥ **४३०** ॥

*līnadhīrapi jāgarti jāgraddharmavivarjitaḥ |*
*bodho nirvāsano yasya sa jīvanmukta iṣyate ||* ***430****||*

शान्तसंसारकलनः कलावानपि निष्कलः ।
यस्य चित्तं विनिश्चिन्तं स जीवन्मुक्त इष्यते ॥ **४३१** ॥

*śāntasaṁsārakalanaḥ kalāvānapi niṣkalaḥ |*
*yasya cittaṁ viniścintaṁ sa jīvanmukta iṣyate ||* ***431****||*

वर्तमानेऽपि देहेऽस्मिञ्छायावदनुवर्तिनि ।
अहन्ताममताऽभावो जीवन्मुक्तस्य लक्षणम् ॥ **४३२** ॥

*vartamāne'pi dehe'smiñchāyāvadanuvartini |*
*ahantāmamatā'bhāvo jīvanmuktasya lakṣaṇam ||* ***432****||*

अतीताननुसन्धानं भविष्यदविचारणम् ।
औदासीन्यमपि प्राप्तं जीवन्मुक्तस्य लक्षणम् ॥ **४३३** ॥

*atītānanusandhānaṁ bhaviṣyadavicāraṇam |*
*audāsīnyamapi prāptaṁ jīvanmuktasya lakṣaṇam ||* ***433****||*

गुणदोषविशिष्टेऽस्मिन्स्वभावेन विलक्षणे ।
सर्वत्र समदर्शित्वं जीवन्मुक्तस्य लक्षणम् ॥ ४३४ ॥

*guṇadoṣaviśiṣṭe'sminsvabhāvena vilakṣaṇe |*
*sarvatra samadarśitvaṁ jīvanmuktasya lakṣaṇam || **434**||*

इष्टानिष्टार्थसम्प्राप्तौ समदर्शितयाऽऽत्मनि ।
उभयत्राविकारित्वं जीवन्मुक्तस्य लक्षणम् ॥ ४३५ ॥

*iṣṭāniṣṭārthasamprāptau samadarśitayā''tmani |*
*ubhayatrāvikāritvaṁ jīvanmuktasya lakṣaṇam || **435**||*

ब्रह्मानन्दरसास्वादासक्तचित्ततया यतेः ।
अन्तर्बहिरविज्ञानं जीवन्मुक्तस्य लक्षणम् ॥ ४३६ ॥

*brahmānandarasāsvādāsaktacittatayā yateḥ |*
*antarbahiravijñānaṁ jīvanmuktasya lakṣaṇam || **436**||*

देहेन्द्रियादौ कर्तव्ये ममाहंभाववर्जितः ।
औदासीन्येन यस्तिष्ठेत्स जीवन्मुक्तलक्षणः ॥ ४३७ ॥

*dehendriyādau kartavye mamāhambhāvavarjitaḥ |*
*audāsīnyena yastiṣṭhetsa jīvanmuktalakṣaṇaḥ || **437**||*

विज्ञात आत्मनो यस्य ब्रह्मभावः श्रुतेर्बलात् ।
भवबन्धविनिर्मुक्तः स जीवन्मुक्तलक्षणः ॥ ४३८ ॥

*vijñāta ātmano yasya brahmabhāvaḥ śruterbalāt |*
*bhavabandhavinirmuktaḥ sa jīvanmuktalakṣaṇaḥ || **438**||*

देहेन्द्रियेष्वहंभाव इदंभावस्तदन्यके ।

यस्य नो भवतः क्वापि स जीवन्मुक्त इष्यते ॥ ४३९ ॥

*dehendriyeṣvahambhāva idambhāvastadanyake |*
*yasya no bhavataḥ kvāpi sa jīvanmukta iṣyate || 439||*

न प्रत्यग्ब्रह्मणोर्भेदं कदापि ब्रह्मसर्गयोः ।

प्रज्ञया यो विजानाति स जीवन्मुक्तलक्षणः ॥ ४४० ॥

*na pratyagbrahmaṇorbhedaṁ kadāpi brahmasargayoḥ |*
*prajñayā yo vijānāti sa jīvanmuktalakṣaṇaḥ || 440||*

साधुभिः पूज्यमानेऽस्मिन्पीड्यमानेऽपि दुर्जनैः ।

समभावो भवेद्यस्य स जीवन्मुक्तलक्षणः ॥ ४४१ ॥

*sādhubhiḥ pūjyamāne'sminpīḍyamāne'pi durjanaiḥ |*
*samabhāvo bhavedyasya sa jīvanmuktalakṣaṇaḥ || 441||*

यत्र प्रविष्टा विषयाः परेरिता

नदीप्रवाहा इव वारिराशौ ।

लीनन्ति सन्मात्रतया न विक्रियां

उत्पादयन्त्येष यतिर्विमुक्तः ॥ ४४२ ॥

*yatra praviṣṭā viṣayāḥ pareritā*
*nadīpravāhā iva vārirāśau |*
*līnanti sanmātratayā na vikriyāṁ*
*utpādayantyeṣa yatirvimuktaḥ || 442||*

विज्ञातब्रह्मतत्त्वस्य यथापूर्वं न संसृतिः ।

अस्ति चेन्न स विज्ञातब्रह्मभावो बहिर्मुखः ॥ **४४३** ॥

*vijñātabrahmatattvasya yathāpūrvaṁ na saṁsṛtiḥ /*
*asti cenna sa vijñātabrahmabhāvo bahirmukhaḥ // **443**//*

प्राचीनवासनावेगादसौ संसरतीति चेत् ।

न सदेकत्वविज्ञानान्मन्दी भवति वासना ॥ **४४४** ॥

*prācīnavāsanāvegādasau saṁsaratīti cet /*
*na sadekatvavijñānānmandī bhavati vāsanā // **444**//*

अत्यन्तकामुकस्यापि वृत्तिः कुण्ठति मातरि ।

तथैव ब्रह्मणि ज्ञाते पूर्णानन्दे मनीषिणः ॥ **४४५** ॥

*atyantakāmukasyāpi vṛttiḥ kuṇṭhati mātari /*
*tathaiva brahmaṇi jñāte pūrṇānande manīṣiṇaḥ // **445**//*

निदिध्यासनशीलस्य बाह्यप्रत्यय ईक्ष्यते ।

ब्रवीति श्रुतिरेतस्य प्रारब्धं फलदर्शनात् ॥ **४४६** ॥

*nididhyāsanaśīlasya bāhyapratyaya īkṣyate /*
*bravīti śrutiretasya prārabdhaṁ phaladarśanāt // **446**//*

सुखाद्यनुभवो यावत्तावत्प्रारब्धमिष्यते ।

फलोदयः क्रियापूर्वो निष्क्रियो न हि कुत्रचित् ॥ **447** ॥

*sukhādyanubhavo yāvattāvatprārabdhamiṣyate /*
*phalodayaḥ kriyāpūrvo niṣkriyo na hi kutracit // **447**//*

अहं ब्रह्मेति विज्ञानात्कल्पकोटिशतार्जितम् ।

सञ्चितं विलयं याति प्रबोधात्स्वप्नकर्मवत् ॥ **४४८** ॥

*ahaṁ brahmeti vijñānātkalpakoṭiśatārjitam /*

*sañcitaṁ vilayaṁ yāti prabodhātsvapnakarmavat //* ***448****//*

यत्कृतं स्वप्नवेलायां पुण्यं वा पापमुल्बणम् ।

सुप्तोत्थितस्य किन्तत्स्यात्स्वर्गाय नरकाय वा ॥ **४४९** ॥

*yatkṛtaṁ svapnavelāyāṁ puṇyaṁ vā pāpamulbaṇam /*

*suptotthitasya kintatsyātsvargāya narakāya vā //* ***449****//*

स्वमसङ्गमुदासीनं परिज्ञाय नभो यथा ।

न श्लिष्यति च यत्किञ्चित्कदाचिद्भाविकर्मभिः ॥ **४५०** ॥

*svamasaṅgamudāsīnaṁ parijñāya nabho yathā /*

*na śliṣyati ca yakkiñcitkadācidbhāvikarmabhiḥ //* ***450****//*

न नभो घटयोगेन सुरागन्धेन लिप्यते ।

तथात्मोपाधियोगेन तद्धर्मैर्नैव लिप्यते ॥ **४५१** ॥

*na nabho ghaṭayogena surāgandhena lipyate /*

*tathātmopādhiyogena taddharmairnaiva lipyate //* ***451****//*

ज्ञानोदयात्पुरारब्धं कर्मज्ञानान्न नश्यति ।

अदत्वा स्वफलं लक्ष्यमुद्दिश्योत्सृष्टबाणवत् ॥ **४५२** ॥

*jñānodayātpurārabdhaṁ karmajñānānna naśyati /*

*adatvā svaphalaṁ lakṣyamuddiśyotsṛṣṭabāṇavat //* ***452****//*

व्याघ्रबुद्ध्या विनिर्मुक्तो बाणः पश्चात्तु गोमतौ ।

न तिष्ठति छिनत्येव लक्ष्यं वेगेन निर्भरम् ॥ **४५३** ॥

*vyāghrabuddhyā vinirmukto bāṇaḥ paścāttu gomatau |*
*na tiṣṭhati chinatyeva lakṣyaṁ vegena nirbharam || **453**||*

प्राब्धं बलवत्तरं खलु विदां भोगेन तस्य क्षयः

सम्यग्ज्ञानहुताशनेन विलयः प्राक्संचितागामिनाम् ।

ब्रह्मात्मैक्यमवेक्ष्य तन्मयतया ये सर्वदा संस्थिताः

तेषां तत्त्रितयं नहि क्वचिदपि ब्रह्मैव ते निर्गुणम् ॥ **४५४** ॥

*prābdhaṁ balavattaraṁ khalu vidāṁ bhogena tasya kṣayaḥ*
*samyagjñānahutāśanena vilayaḥ prāksañcitāgāminām |*
*brahmātmaikyamavekṣya tanmayatayā ye sarvadā saṁsthitāḥ*
*teṣāṁ tattritayaṁ nahi kvacidapi*
*brahmaiva te nirguṇam || **454**||*

उपाधितादात्म्यविहीनकेवल-

ब्रह्मात्मनैवात्मनि तिष्ठतो मुनेः ।

प्रारब्धसद्भावकथा न युक्ता

स्वप्नार्थसंबन्धकथेव जाग्रतः ॥ **४५५** ॥

*upādhitādātmyavihīnakevala-*
*brahmātmanaivātmani tiṣṭhato muneḥ |*
*prārabdhasadbhāvakathā na yuktā*
*svapnārthasambandhakatheva jāgrataḥ || **455**||*

न हि प्रबुद्धः प्रतिभासदेहे देहोपयोगिन्यपि च प्रपञ्चे ।
करोत्यहन्तां ममतामिदन्तां किन्तु स्वयं तिष्ठति जागरेण ॥ ४५६ ॥

*na hi prabuddhaḥ pratibhāsadehe dehopayoginyapi ca prapañce |*
*karotyahantāṁ mamatāmidantāṁ*
*kintu svayaṁ tiṣṭhati jāgareṇa || **456**||*

न तस्य मिथ्यार्थसमर्थनेच्छा न संग्रहस्तज्जगतोऽपि दृष्टः ।
तत्रानुवृत्तिर्यदि चेन्मृषार्थे न निद्रया मुक्त इतीष्यते ध्रुवम् ॥ ४५७ ॥

*na tasya mithyārthasamarthanecchā*
*na saṅgrahastajjagato'pi dṛṣṭaḥ |*
*tatrānuvṛttiryadi cenmṛṣārthe*
*na nidrayā mukta itīṣyate dhruvam || **457**||*

तद्वत्परे ब्रह्मणि वर्तमानः सदात्मना तिष्ठति नान्यदीक्षते ।
स्मृतिर्यथा स्वप्नविलोकितार्थे तथा विदः प्राशनमोचनादौ ॥ ४५८ ॥

*tadvatpare brahmaṇi vartamānaḥ*
*sadātmanā tiṣṭhati nānyadīkṣate |*
*smṛtiryathā svapnavilokitārthe*
*tathā vidaḥ prāśanamocanādau || **458**||*

कर्मणा निर्मितो देहः प्रारब्धं तस्य कल्प्यताम् ।
नानादेरात्मनो युक्तं नैवात्मा कर्मनिर्मितः ॥ ४५९ ॥

*karmaṇā nirmito dehaḥ prārabdhaṁ tasya kalpyatām |*
*nānāderātmano yuktaṁ naivātmā karmanirmitaḥ || **459**||*

अजो नित्यः शाश्वत इति ब्रूते श्रुतिरमोघवाक्त्वे ।

तदात्मना तिष्ठतोऽस्य कुतः प्रारब्धकल्पना ॥ ४६० ॥

*ajo nityaḥ śāśvata iti brūte śrutiramoghavāk |*
*tadātmanā tiṣṭhato'sya kutaḥ prārabdhakalpanā || **460**||*

प्रारब्धं सिध्यति तदा यदा देहात्मना स्थितिः ।

देहात्मभावो नैवेष्टः प्रारब्धं त्यज्यतामतः ॥ ४६१ ॥

*prārabdhaṁ sidhyati tadā yadā dehātmanā sthitiḥ |*
*dehātmabhāvo naiveṣṭaḥ*
*prārabdhaṁ tyajyatāmataḥ || **461**||*

शरीरस्यापि प्रारब्धकल्पना भ्रान्तिरेव हि ।

अध्यस्तस्य कुतः सत्त्वमसत्यस्य कुतो जनिः ।

अजातस्य कुतो नाशः प्रारब्धमसतः कुतः ॥ ४६२ ॥

*śarīrasyāpi prārabdhakalpanā bhrāntireva hi |*
*adhyastasya kutaḥ sattvamasatyasya kuto janiḥ |*
*ajātasya kuto nāśaḥ prārabdhamasataḥ kutaḥ || **462**||*

ज्ञानेनाज्ञानकार्यस्य समूलस्य लयो यदि ।

तिष्ठत्ययं कथं देह इति शङ्कावतो जडान् ॥ ४६३ ॥

*jñānenājñānakāryasya samūlasya layo yadi |*
*tiṣṭhatyayaṁ kathaṁ deha iti śaṅkāvato jaḍān || **463**||*

समाधातुं बाह्यदृष्ट्या प्रारब्धं वदति श्रुतिः।
न तु देहादिसत्यत्वबोधनाय विपश्चिताम्॥ ४६४॥

*samādhātuṁ bāhyadṛṣṭyā prārabdhaṁ vadati śrutiḥ |*
*na tu dehādisatyatvabodhanāya vipaścitām ||* ***464****||*

परिपूर्णमनाद्यन्तमप्रमेयमविक्रियम्।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन॥ ४६५॥

*paripūrṇamanādyantamaprameyamavikriyam |*
*ekamevādvayaṁ brahma neha nānāsti kiñcana ||* ***465****||*

सद्घनं चिद्घनं नित्यमानन्दघनमक्रियम्।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन॥ ४६६॥

*sadghanaṁ cidghanaṁ nityamānandaghanamakriyam |*
*ekamevādvayaṁ brahma neha nānāsti kiñcana ||* ***466****||*

प्रत्यगेकरसं पूर्णमनन्तं सर्वतोमुखम्।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन॥ ४६७॥

*pratyagekarasaṁ pūrṇamanantaṁ sarvatomukham |*
*ekamevādvayaṁ brahma neha nānāsti kiñcana ||* ***467****||*

अहेयमनुपादेयमनादेयमनाश्रयम्।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन॥ ४६८॥

*aheyamanupādeyamanādeyamanāśrayam |*
*ekamevādvayaṁ brahma neha nānāsti kiñcana ||* ***468****||*

निर्गुणं निष्कलं सूक्ष्मं निर्विकल्पं निरञ्जनम् ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥ ४६९ ॥

*nirguṇaṁ niṣkalaṁ sūkṣmaṁ nirvikalpaṁ nirañjanam |*
*ekamevādvayaṁ brahma neha nānāsti kiñcana ||* ***469****||*

अनिरूप्य स्वरूपं यन्मनोवाचामगोचरम् ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥ ४७० ॥

*anirūpya svarūpaṁ yanmanovācāmagocaram |*
*ekamevādvayaṁ brahma neha nānāsti kiñcana ||* ***470****||*

सत्समृद्धं स्वतःसिद्धं शुद्धं बुद्धमनीदृशम् ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥ ४७१ ॥

*satsamṛddhaṁ svataḥsiddhaṁ śuddhaṁ buddhamanīdṛśam |*
*ekamevādvayaṁ brahma neha nānāsti kiñcana ||* ***471****||*

निरस्तरागा विनिरस्तभोगाः
शान्ताः सुदान्ता यतयो महान्तः ।
विज्ञाय तत्त्वं परमेतदन्ते
प्राप्ताः परां निर्वृतिमात्मयोगात् ॥ ४७२ ॥

*nirastarāgā vinirastabhogāḥ*
*śāntāḥ sudāntā yatayo mahāntaḥ |*
*vijñāya tattvaṁ parametadante*
*prāptāḥ parāṁ nirvṛtimātmayogāt ||* ***472****||*

भवानपीदं परतत्त्वमात्मनः

स्वरूपमानन्दघनं विचार्य ।

विधूय मोहं स्वमनःप्रकल्पितं

मुक्तः कृतार्थो भवतु प्रबुद्धः ॥ **४७३** ॥

*bhavānapīdaṁ paratattvamātmanaḥ*
*svarūpamānandaghanaṁ vicārya |*
*vidhūya mohaṁ svamanaḥprakalpitaṁ*
*muktaḥ kṛtārtho bhavatu prabuddhaḥ || **473**||*

समाधिना साधुविनिश्चलात्मना पश्यात्मतत्त्वं स्फुटबोधचक्षुषा ।

निःसंशयं सम्यगवेक्षितश्चे-च्छ्रुतः पदार्थो न पुनर्विकल्प्यते ॥ **४७४** ॥

*samādhinā sādhuviniścalātmanā*
*paśyātmatattvaṁ sphuṭabodhacakṣuṣā |*
*niḥsaṁśayaṁ samyagavekṣitaśce-*
*cchrutaḥ padārtho na punarvikalpyate || **474**||*

स्वस्याविद्याबन्धसम्बन्धमोक्षा-

त्सत्यज्ञानानन्दरूपात्मलब्धौ ।

शास्त्रं युक्तिर्देशिकोक्तिः प्रमाणं

चान्तःसिद्धा स्वानुभूतिः प्रमाणम् ॥ **४७५** ॥

*svasyāvidyābandhasambandhamokṣā-*
*tsatyajñānānandarūpātmalabdhau |*
*śāstraṁ yuktirdeśikoktiḥ pramāṇaṁ*
*cāntaḥsiddhā svānubhūtiḥ pramāṇam || **475**||*

बन्धो मोक्षश्च तृप्तिश्च चिन्ताऽऽरोग्यक्षुदादयः ।
स्वेनैव वेद्या यज्ज्ञानं परेषामानुमानिकम् ॥ ४७६ ॥

*bandho mokṣaśca tṛptiśca cintā''rogyakṣudādayaḥ |*
*svenaiva vedyā yajjñānaṁ pareṣāmānumānikam ||* ***476****||*

तटस्थिता बोधयन्ति गुरवः श्रुतयो यथा ।
प्रज्ञयैव तरेद्विद्वानीश्वरानुगृहीतया ॥ ४७७ ॥

*taṭasthitā bodhayanti guravaḥ śrutayo yathā |*
*prajñayaiva taredvidvānīśvarānugṛhītayā ||* ***477****||*

स्वानुभूत्या स्वयं ज्ञात्वा स्वमात्मानमखण्डितम् ।
संसिद्धः सम्मुखं तिष्ठेन्निर्विकल्पात्मनाऽऽत्मनि ॥ ४७८ ॥

*svānubhūtyā svayaṁ jñātvā svamātmānamakhaṇḍitam |*
*saṁsiddhaḥ sammukhaṁ tiṣṭhennirvikalpātmanā''tmani ||* ***478****||*

वेदान्तसिद्धान्तनिरुक्तिरेषा
ब्रह्मैव जीवः सकलं जगच्च ।
अखण्डरूपस्थितिरेव मोक्षो
ब्रह्माद्वितीये श्रुतयः प्रमाणम् ॥ ४७९ ॥

*vedāntasiddhāntaniruktireṣā*
*brahmaiva jīvaḥ sakalaṁ jagacca |*
*akhaṇḍarūpasthitireva mokṣo*
*brahmādvitīye śrutayaḥ pramāṇam ||* ***479****||*

इति गुरुवचनाच्छ्रुतिप्रमाणात्

परमवगम्य सतत्त्वमात्मयुक्त्या ।

प्रशमितकरणः समाहितात्मा

क्वचिदचलाकृतिरात्मनिष्ठतोऽभूत् ॥ ४८० ॥

*iti guruvacanācchrutipramāṇāt*
*paramavagamya satattvamātmayuktyā /*
*praśamitakaraṇaḥ samāhitātmā*
*kvacidacalākṛtirātmaniṣṭhato'bhūt // **480**//*

किञ्चित्कालं समाधाय परे ब्रह्मणि मानसम् ।

उत्थाय परमानन्दादिदं वचनमब्रवीत् ॥ ४८१ ॥

*kiñcitkālaṁ samādhāya pare brahmaṇi mānasam /*
*utthāya paramānandādidaṁ vacanamabravīt // **481**//*

बुद्धिर्विनष्टा गलिता प्रवृत्तिः

ब्रह्मात्मनोरेकतयाऽधिगत्या ।

इदं न जानेऽप्यनिदं न जाने

किं वा कियद्वा सुखमस्त्यपारम् ॥ ४८२ ॥

*buddhirvinaṣṭā galitā pravṛttiḥ*
*brahmātmanorekatayā'dhigatyā /*
*idaṁ na jāne'pyanidaṁ na jāne*
*kiṁ vā kiyadvā sukhamastyapāram // **482**//*

वाचा वक्तुमशक्यमेव मनसा मन्तुं न वा शक्यते
स्वानन्दामृतपूरपूरितपरब्रह्माम्बुधेर्वैभवम् ।
अम्भोराशिविशीर्णवार्षिकशिलाभावं भजन्मे मनो
यस्यांशांशलवे विलीनमधुनाऽऽनन्दात्मना निर्वृतम् ॥ **४८३** ॥

*vācā vaktumaśakyameva manasā mantuṁ na vā śakyate*
*svānandāmṛtapūrapūritaparabrahmāmbudhervaibhavam |*
*ambhorāśiviśīrṇavārṣikaśilābhāvaṁ bhajanme mano*
*yasyāṁśāṁśalave vilīnamadhunā''nandātmanā nirvṛtam || **483**||*

क्व गतं केन वा नीतं कुत्र लीनमिदं जगत् ।
अधुनैव मया दृष्टं नास्ति किं महदद्भुतम् ॥ **४८४** ॥

*kva gataṁ kena vā nītaṁ kutra līnamidaṁ jagat |*
*adhunaiva mayā dṛṣṭaṁ nāsti kiṁ mahadadbhutam || **484**||*

किं हेयं किमुपादेयं किमन्यत्किं विलक्षणम् ।
अखण्डानन्दपीयूषपूर्णे ब्रह्ममहार्णवे ॥ **४८५** ॥

*kiṁ heyaṁ kimupādeyaṁ kimanyatkiṁ vilakṣaṇam |*
*akhaṇḍānandapīyūṣapūrṇe brahmamahārṇave || **485**||*

न किञ्चिदत्र पश्यामि न शृणोमि न वेद्म्यहम् ।
स्वात्मनैव सदानन्दरूपेणास्मि विलक्षणः ॥ **४८६** ॥

*na kiñcidatra paśyāmi na śṛṇomi na vedmyaham |*
*svātmanaiva sadānandarūpeṇāsmi vilakṣaṇaḥ || **486**||*

नमो नमस्ते गुरवे महात्मने

विमुक्तसङ्गाय सदुत्तमाय ।

नित्याद्वयानन्दरसस्वरूपिणे

भूम्ने सदाऽपारदयाम्बुधाम्ने ॥ ४८७ ॥

*namo namaste gurave mahātmane*
*vimuktasaṅgāya saduttamāya |*
*nityādvayānandarasasvarūpiṇe*
*bhūmne sadā'pāradayāmbudhāmne ||* ***487***||

यत्कटाक्षशशिसान्द्रचन्द्रिका-

पातधूतभवतापजश्रमः ।

प्राप्तवानहमखण्डवैभवा-

नन्दमात्मपदमक्षयं क्षणात् ॥ ४८८ ॥

*yatkaṭākṣaśaśisāndracandrikā-*
*pātadhūtabhavatāpajaśramaḥ |*
*prāptavānahamakhaṇḍavaibhavā-*
*nandamātmapadamakṣayaṁ kṣaṇāt ||* ***488***||

धन्योऽहं कृतकृत्योऽहं विमुक्तोऽहं भवग्रहात् ।

नित्यानन्दस्वरूपोऽहं पूर्णोऽहं त्वदनुग्रहात् ॥ ४८९ ॥

*dhanyo'haṁ kṛtakṛtyo'haṁ vimukto'haṁ bhavagrahāt |*
*nityānandasvarūpo'haṁ pūrṇo'haṁ tvadanugrahāt ||* ***489***||

असङ्गोऽहमनङ्गोऽहमलिङ्गोऽहमभङ्गुरः ।
प्रशान्तोऽहमनन्तोऽहममलोऽहं चिरन्तनः ॥ ४९० ॥

*asaṅgo'hamanaṅgo'hamaliṅgo'hamabhaṅguraḥ |*
*praśānto'hamananto'hamamalo'haṁ cirantanaḥ || 490||*

अकर्ताहमभोक्ताहमविकारोऽहमक्रियः ।
शुद्धबोधस्वरूपोऽहं केवलोऽहं सदाशिवः ॥ ४९१ ॥

*akartāhamabhoktāhamavikāro'hamakriyaḥ |*
*śuddhabodhasvarūpo'haṁ kevalo'haṁ sadāśivaḥ || 491||*

द्रष्टुः श्रोतुर्वक्तुः कर्तुर्भोक्तुर्विभिन्न एवाहम् ।
नित्यनिरन्तरनिष्क्रियनिःसीमासङ्गपूर्णबोधात्मा ॥ ४९२ ॥

*draṣṭuḥ śroturvaktuḥ karturbhokturvibhinna evāham |*
*nityanirantaraniṣkriyaniḥsīmāsaṅgapūrṇabodhātmā || 492||*

नाहमिदं नाहमदोऽप्युभयोरवभासकं परं शुद्धम् ।
बाह्याभ्यन्तरशून्यं पूर्णं ब्रह्माद्वितीयमेवाहम् ॥ ४९३ ॥

*nāhamidaṁ nāhamado'pyubhayoravabhāsakaṁ paraṁ śuddham |*
*bāhyābhyantaraśūnyaṁ pūrṇaṁ brahmādvitīyamevāham || 493||*

निरुपमममनादितत्त्वं त्वमहमिदमद इति कल्पनादूरम् ।
नित्यानन्दैकरसं सत्यं ब्रह्माद्वितीयमेवाहम् ॥ ४९४ ॥

*nirupamamanāditattvaṁ tvamahamidamada iti kalpanādūram |*
*nityānandaikarasaṁ satyaṁ brahmādvitīyamevāham || 494||*

नारायणोऽहं नरकान्तकोऽहं

पुरान्तकोऽहं पुरुषोऽहमीशः।

अखण्डबोधोऽहमशेषसाक्षी

निरीश्वरोऽहं निरहं च निर्ममः॥ ४९५॥

*nārāyaṇo'haṁ narakāntako'haṁ*
*purāntako'haṁ puruṣo'hamīśaḥ |*
*akhaṇḍabodho'hamaśeṣasākṣī*
*nirīśvaro'haṁ nirahaṁ ca nirmamaḥ || **495**||*

सर्वेषु भूतेष्वहमेव संस्थितो

ज्ञानात्मनाऽन्तर्बहिराश्रयः सन्।

भोक्ता च भोग्यं स्वयमेव सर्वं

यद्यत्पृथग्दृष्टमिदन्तया पुरा॥ ४९६॥

*sarveṣu bhūteṣvahameva saṁsthito*
*jñānātmanā'ntarbahirāśrayaḥ san |*
*bhoktā ca bhogyaṁ svayameva sarvaṁ*
*yadyatpṛthagdṛṣṭamidantayā purā || **496**||*

मय्यखण्डसुखाम्भोधौ बहुधा विश्ववीचयः।

उत्पद्यन्ते विलीयन्ते मायामारुतविभ्रमात्॥ ४९७॥

*mayyakhaṇḍasukhāmbhodhau bahudhā viśvavīcayaḥ |*
*utpadyante vilīyante māyāmārutavibhramāt || **497**||*

स्थुलादिभावा मयि कल्पिता भ्रमा- दारोपितानुस्फुरणेन लोकैः।
काले यथा कल्पकवत्सराय- णर्त्वा दयो निष्कलनिर्विकल्पे॥ **४९८**॥

*sthulādibhāvā mayi kalpitā bhramā-*
*dāropitānusphuraṇena lokaiḥ* /
*kāle yathā kalpakavatsarāya-*
*ṇartvā dayo niṣkalanirvikalpe* // **498**//

आरोपितं नाश्रयदूषकं भवेत् कदापि मूढैरतिदोषदूषितैः।
नार्द्रिकरोत्यूषरभूमिभागं मरीचिकावारि महाप्रवाहः॥ **४९९**॥

*āropitaṁ nāśrayadūṣakaṁ bhavet*
*kadāpi mūḍhairatidoṣadūṣitaiḥ* /
*nārdrikarotyūṣarabhūmibhāgaṁ*
*marīcikāvāri mahāpravāhaḥ* // **499**//

आकाशवल्लेपविदूरगोऽहं आदित्यवद्भास्यविलक्षणोऽहम्।
अहार्यवन्नित्यविनिश्चलोऽहं अम्भोधिवत्पारविवर्जितोऽहम्॥ **५००**॥

*ākāśavallepavidūrago'haṁ*
*ādityavadbhāsyavilakṣaṇo'ham* /
*ahāryavannityaviniścalo'haṁ*
*ambhodhivatpāravivarjito'ham* // **500**//

न मे देहेन सम्बन्धो मेघेनेव विहायसः।
अतः कुतो मे तद्धर्मा जाग्रत्स्वप्नसुषुप्तयः॥ **५०१**॥

*na me dehena sambandho megheneva vihāyasaḥ* /
*ataḥ kuto me taddharmā jākratsvapnasuṣuptayaḥ* // **501**//

उपाधिरायाति स एव गच्छति स एव कर्माणि करोति भुङ्क्ते ।
स एव जीर्यन् म्रियते सदाहं कुलाद्रिवन्निश्चल एव संस्थितः ॥ ५०२ ॥

*upādhirāyāti sa eva gacchati sa eva karmāṇi karoti bhuṅkte |*
*sa eva jīryan mriyate sadāhaṁ*
*kulādrivanniścala eva saṁsthitaḥ || 502||*

न मे प्रवृत्तिर्न च मे निवृत्तिः सदैकरूपस्य निरंशकस्य ।
एकात्मको यो निविडो निरन्तरो व्योमेव पूर्णः स कथं नु चेष्टते ॥ ५०३ ॥

*na me pravṛttirna ca me nivṛttiḥ*
*sadaikarūpasya niraṁśakasya |*
*ekātmako yo niviḍo nirantaro*
*vyomeva pūrṇaḥ sa kathaṁ nu ceṣṭate || 503||*

पुण्यानि पापानि निरिन्द्रियस्य निश्चेतसो निर्विकृतेर्निराकृतेः ।
कुतो ममाखण्डसुखानुभूतेः ब्रूते ह्यनन्वागतमित्यपि श्रुतिः ॥ ५०४ ॥

*puṇyāni pāpāni nirindriyasya*
*niścetaso nirvikṛternirākṛteḥ |*
*kuto mamākhaṇḍasukhānubhūteḥ*
*brūte hyananvāgatamityapi śrutiḥ || 504||*

छायया स्पृष्टमुष्णं वा शीतं वा सुष्ठु दुःष्ठु वा ।
न स्पृशत्येव यत्किञ्चित्पुरुषं तद्विलक्षणम् ॥ ५०५ ॥

*chāyayā spṛṣṭamuṣṇaṁ vā śītaṁ vā suṣṭhu duḥṣṭhu vā |*
*na spṛśatyeva yatkiñcitpuruṣaṁ tadvilakṣaṇam || 505||*

न साक्षिणं साक्ष्यधर्माः संस्पृशन्ति विलक्षणम्।

अविकारमुदासीनं गृहधर्माः प्रदीपवत्॥ ५०६ ॥

*na sākṣiṇaṁ sākṣyadharmāḥ saṁspṛśanti vilakṣaṇam |*
*avikāramudāsīnaṁ gṛhadharmāḥ pradīpavat || 506||*

रवेर्यथा कर्मणि साक्षिभावो व वह्नेर्यथा दाहनियामकत्वम्।

रज्जोर्यथाऽऽरोपितवस्तुसङ्गः तथैव कूटस्थचिदात्मनो मे ॥ ५०७ ॥

*raveryathā karmaṇi sākṣibhāvo vahneryathā dāhaniyāmakatvam |*
*rajjoryathā''ropitavastusaṅgaḥ*
*tathaiva kūṭasthacidātmano me || 507||*

कर्तापि वा कारयितापि नाहं भोक्तापि वा भोजयितापि नाहम्।

द्रष्टापि वा दर्शयितापि नाहं सोऽहं स्वयंज्योतिरनीदृगात्मा ॥ ५०८ ॥

*kartāpi vā kārayitāpi nāhaṁ*
*bhoktāpi vā bhojayitāpi nāham |*
*draṣṭāpi vā darśayitāpi nāhaṁ*
*so'haṁ svayañjyotiranīdṛgātmā || 508||*

चलत्युपाधौ प्रतिबिम्बलौल्य-मौपाधिकं मूढधियो नयन्ति।

स्वबिम्बभूतं रविवद्विनिष्क्रियं कर्तास्मि भोक्तास्मि हतोऽस्मि हेति ॥ ५०९ ॥

*calatyupādhau pratibimbalaulya-*
*maupādhikaṁ mūḍhadhiyo nayanti |*
*svabimbabhūtaṁ ravivadviniṣkriyaṁ*
*kartāsmi bhoktāsmi hato'smi heti || 509||*

जले वापि स्थले वापि लुठत्वेष जडात्मकः।

नाहं विलिप्ये तद्धर्मैर्घटधर्मैर्नभो यथा॥ ५१०॥

*jale vāpi sthale vāpi luṭhatveṣa jaḍātmakaḥ |*

*nāhaṁ vilipye taddharmairghaṭadharmairnabho yathā ||* ***510***||

कर्तृत्वभोक्तृत्वखलत्वमत्तता-जडत्वबद्धत्वविमुक्ततादयः।

बुद्धेर्विकल्पा न तु सन्ति वस्तुतः स्वस्मिन्परे ब्रह्मणि केवलेऽद्वये॥ ५११॥

*kartṛtvabhoktṛtvakhalatvamattatā-*

*jaḍatvabaddhatvavimuktatādayaḥ |*

*buddhervikalpā na tu santi vastutaḥ*

*svasminpare brahmaṇi kevale'dvaye ||* ***511***||

सन्तु विकाराः प्रकृतेर्दशधा शतधा सहस्रधा वापि।

किं मेऽसङ्गचितस्तैर्न घनः क्वचिदम्बरं स्पृशति॥ ५१२॥

*santu vikārāḥ prakṛterdaśadhā śatadhā sahasradhā vāpi |*

*kiṁ me'saṅgacitastairna ghanaḥ kvacidambaraṁ spṛśati ||* ***512***||

अव्यक्तादिस्थूलपर्यन्तमेतत् विश्व यत्राभासमात्रं प्रतीतम्।

व्योमप्रख्यं सूक्ष्ममाद्यन्तहीनं ब्रह्माद्वैतं यत्तदेवाहमस्मि॥ ५१३॥

*avyaktādisthūlaparyantametat*

*viśva yatrābhāsamātraṁ pratītam |*

*vyomaprakhyaṁ sūkṣmamādyantahīnaṁ*

*brahmādvaitaṁ yattadevāhamasmi ||* ***513***||

सर्वाधारं सर्ववस्तुप्रकाशं सर्वाकारं सर्वगं सर्वशून्यम् ।
नित्यं शुद्धं निश्चलं निर्विकल्पं ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥ ५१४ ॥

*sarvādhāraṁ sarvavastuprakāśaṁ*
*sarvākāraṁ sarvagaṁ sarvaśūnyam /*
*nityaṁ śuddhaṁ niścalaṁ nirvikalpaṁ*
*brahmādvaitaṁ yattadevāhamasmi //* ***514****//*

यत्प्रत्यस्ताशेषमायाविशेषं प्रत्यग्रूपं प्रत्ययागम्यमानम् ।
सत्यज्ञानानन्तमानन्दरूपं ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥ ५१५ ॥

*yatpratyastāśeṣamāyāviśeṣaṁ*
*pratyagrūpaṁ pratyayāgamyamānam /*
*satyajñānānantamānandarūpaṁ*
*brahmādvaitaṁ yattadevāhamasmi //* ***515****//*

निष्क्रियोऽस्म्यविकारोऽस्मि निष्कलोऽस्मि निराकृतिः ।
निर्विकल्पोऽस्मि नित्योऽस्मि निरालम्बोऽस्मि निर्द्वयः ॥ ५१६ ॥

*niṣkriyo'smyavikāro'smi niṣkalo'smi nirākṛtiḥ /*
*nirvikalpo'smi nityo'smi nirālambo'smi nirdvayaḥ //* ***516****//*

सर्वात्मकोऽहं सर्वोऽहं सर्वातीतोऽहमद्वयः ।
केवलाखण्डबोधोऽहमानन्दोऽहं निरन्तरः ॥ ५१७ ॥

*sarvātmako'haṁ sarvo'haṁ sarvātīto'hamadvayaḥ /*
*kevalākhaṇḍabodho'hamānando'haṁ nirantaraḥ //* ***517****//*

स्वाराज्यसाम्राज्यविभूतिरेषा भवत्कृपाश्रीमहिमप्रसादात्।
प्राप्ता मया श्रीगुरवे महात्मने नमो नमस्तेऽस्तु पुनर्नमोऽस्तु॥ ५१८॥

*svārājyasāmrājyavibhūtireṣā bhavatkṛpāśrīmahimaprasādāt |*
*prāptā mayā śrīgurave mahātmane*
*namo namaste'stu punarnamo'stu || **518**||*

महास्वप्ने मायाकृतजनिजरामृत्युगहने
भ्रमन्तं क्लिश्यन्तं बहुलतरतापैरनुदिनम्।
अहंकारव्याघ्रव्यथितमिममत्यन्तकृपया
प्रबोध्य प्रस्वापात्परमवितवान्मामसि गुरो॥ ५१९॥

*mahāsvapne māyākṛtajanijarāmṛtyugahane*
*bhramantaṁ kliśyantaṁ bahulataratāpairanudinam |*
*ahaṅkāravyāghravyathitamimamatyantakṛpayā*
*prabodhya prasvāpātparamavitavānmāmasi guro || **519**||*

नमस्तस्मै सदैकस्मै कस्मैचिन्महसे नमः।
यदेतद्विश्वरूपेण राजते गुरुराज ते॥ ५२०॥

*namastasmai sadaikasmai kasmaicinmahase namaḥ |*
*yadetadviśvarūpeṇa rājate gururāja te || **520**||*

इति नतमवलोक्य शिष्यवर्यं समधिगतात्मसुखं प्रबुद्धतत्त्वम्।
प्रमुदितहृदयं स देशिकेन्द्रः पुनरिदमाह वचः परं महात्मा॥ ५२१॥

*iti natamavalokya śiṣyavaryaṁ*
*samadhigatātmasukhaṁ prabuddhatattvam |*

*pramuditahṛdayaṁ sa deśikendraḥ*
*punaridamāha vacaḥ paraṁ mahātmā // **521**//*

ब्रह्मप्रत्ययसन्ततिर्जगदतो ब्रह्मैव तत्सर्वतः
पश्याध्यात्मदृशा प्रशान्तमनसा सर्वास्ववस्थास्वपि ।
रूपादन्यदवेक्षितं किमभितश्चक्षुष्मतां दृश्यते
तद्वद्ब्रह्मविदः सतः किमपरं बुद्धेर्विहारास्पदम् ॥ **५२२** ॥

*brahmapratyayasantatirjagadato brahmaiva tatsarvataḥ*
*paśyādhyātmadṛśā praśāntamanasā sarvāsvavasthāsvapi /*
*rūpādanyadavekṣitaṁ kimabhitaścakṣuṣmatāṁ dṛśyate*
*tadvadbrahmavidaḥ sataḥ kimaparaṁ*
*buddhervihārāspadam // **522**//*

कस्तां परानन्दरसानुभूति-मृत्सृज्य शून्येषु रमेत विद्वान् ।
चन्द्रे महाल्हादिनि दीप्यमाने चित्रेन्दुमालोकयितुं क इच्छेत् ॥ **५२३** ॥

*kastāṁ parānandarasānubhūti-mṛtsṛjya śūnyeṣu rameta vidvān /*
*candre mahālhādini dīpyamāne*
*citrendumālokayituṁ ka icchet // **523**//*

असत्पदार्थानुभवेन किञ्चिन् न ह्यस्ति तृप्तिर्न च दुःखहानिः ।
तदद्वयानन्दरसानुभूत्या तृप्तः सुखं तिष्ठ सदात्मनिष्ठया ॥ **५२४** ॥

*asatpadārthānubhavena kiñcin*
*na hyasti tṛptirna ca duḥkhahāniḥ /*
*tadadvayānandarasānubhūtyā*
*tṛptaḥ sukhaṁ tiṣṭha sadātmaniṣṭhayā // **524**//*

स्वमेव सर्वथा पश्यन्मन्यमानः स्वमद्वयम् ।

स्वानन्दमनुभुञ्जानः कालं नय महामते ॥ **५२५** ॥

*svameva sarvathā paśyanmanyamānaḥ svamadvayam |*
*svānandamanubhuñjānaḥ kālaṁ naya mahāmate || **525**||*

अखण्डबोधात्मनि निर्विकल्पे विकल्पनं व्योम्नि पुरप्रकल्पनम् ।

तदद्वयानन्दमयात्मना सदा शान्तिं परामेत्य भजस्व मौनम् ॥ **५२६** ॥

*akhaṇḍabodhātmani nirvikalpe*
*vikalpanaṁ vyomni puraprakalpanam |*
*tadadvayānandamayātmanā sadā*
*śāntiṁ parāmetya bhajasva maunam || **526**||*

तूष्णीमवस्था परमोपशान्तिः बुद्धेरसत्कल्पविकल्पहेतोः ।

ब्रह्मात्मन ब्रह्मविदो महात्मनो

यत्राद्वयानन्दसुखं निरन्तरम् ॥ **५२७** ॥

*tūṣṇīmavasthā paramopaśāntiḥ buddherasatkalpavikalpahetoḥ |*
*brahmātmana brahmavido mahātmano*
*yatrādvayānandasukhaṁ nirantaram || **527**||*

नास्ति निर्वासनान्मौनात्परं सुखकृदुत्तमम् ।

विज्ञातात्मस्वरूपस्य स्वानन्दरसपायिनः ॥ **५२८** ॥

*nāsti nirvāsanānmaunātparaṁ sukhakṛduttamam |*
*vijñātātmasvarūpasya svānandarasapāyinaḥ || **528**||*

गच्छंस्तिष्ठन्नुपविशञ्छयानो वाऽन्यथापि वा ।
यथेच्छया वसेद्विद्वानात्मारामः सदा मुनिः ॥ **५२९** ॥

*gacchaṁstiṣṭhannupaviśañchayāno vā'nyathāpi vā |*
*yathecchayā vasedvidvānātmārāmaḥ sadā muniḥ || **529**||*

न देशकालासनदिग्यमादि-लक्ष्याद्यपेक्षाऽप्रतिबद्धवृत्तेः ।
संसिद्धतत्त्वस्य महात्मनोऽस्ति स्ववेदने का नियमाद्यवस्था ॥ **५३०** ॥

*na deśakālāsanadigyamādi-lakṣyādyapekṣā'pratibaddhavṛtteḥ |*
*saṁsiddhatattvasya mahātmano'sti*
*svavedane kā niyamādyavasthā || **530**||*

घटोऽयमिति विज्ञातुं नियमः कोऽन्ववेक्षते ।
विना प्रमाणसुष्ठुत्वं यस्मिन्सति पदार्थधीः ॥ **५३१** ॥

*ghaṭo'yamiti vijñātuṁ niyamaḥ ko'nvavekṣate |*
*vinā pramāṇasuṣṭhutvaṁ yasminsati padārthadhīḥ || **531**||*

अयमात्मा नित्यसिद्धः प्रमाणे सति भासते ।
न देशं नापि कालं न शुद्धिं वाप्यपेक्षते ॥ **५३२** ॥

*ayamātmā nityasiddhaḥ pramāṇe sati bhāsate |*
*na deśaṁ nāpi kālaṁ na śuddhiṁ vāpyapekṣate || **532**||*

देवदत्तोऽहमित्येतद्विज्ञानं निरपेक्षकम् ।
तद्वद्ब्रह्मविदोऽप्यस्य ब्रह्माहमिति वेदनम् ॥ **५३३** ॥

*devadatto'hamotyetadvijñānaṁ nirapekṣakam |*
*tadvadbrahmavido'pyasya brahmāhamiti vedanam || **533**||*

भानुनेव जगत्सर्वं भासते यस्य तेजसा ।
अनात्मकमसत्तुच्छं किं नु तस्यावभासकम् ॥ **५३४** ॥
*bhānuneva jagatsarvaṁ bhāsate yasya tejasā |*
*anātmakamasattucchaṁ kiṁ nu tasyāvabhāsakam || **534**||*

वेदशास्त्रपुराणानि भूतानि सकलान्यपि ।
येनार्थवन्ति तं किन्नु विज्ञातारं प्रकाशयेत् ॥ **५३५** ॥
*vedaśāstrapurāṇāni bhūtāni sakalānyapi |*
*yenārthavanti taṁ kinnu vijñātāraṁ prakāśayet || **535**||*

एष स्वयंज्योतिरनन्तशक्तिः आत्माऽप्रमेयः सकलानुभूतिः ।
यमेव विज्ञाय विमुक्तबन्धो जयत्ययं ब्रह्मविदुत्तमोत्तमः ॥ **५३६** ॥
*eṣa svayañjyotiranantaśaktiḥ ātmā'prameyaḥ sakalānubhūtiḥ |*
*yameva vijñāya vimuktabandho*
*jayatyayaṁ brahmaviduttamottamaḥ || **536**||*

न खिद्यते नो विषयैः प्रमोदते न सज्जते नापि विरज्यते च ।
स्वस्मिन्सदा क्रीडति नन्दति स्वयं निरन्तरानन्दरसेन तृप्तः ॥ **५३७** ॥
*na khidyate no viṣayaiḥ pramodate na sajjate nāpi virajyate ca |*
*svasminsadā krīḍati nandati svayaṁ*
*nirantarānandarasena tṛptaḥ || **537**||*

क्षुधां देहव्यथां त्यक्त्वा बालः क्रीडति वस्तुनिः ।
तथैव विद्वान् रमते निर्ममो निरहं सुखी ॥ ५३८ ॥

*kṣudhāṁ dehavyathāṁ tyaktvā bālaḥ krīḍati vastuniḥ /*
*tathaiva vidvān ramate nirmamo nirahaṁ sukhī // **538**//*

चिन्ताशून्यमदैन्यभैक्षमशनं पानं सरिद्वारिषु
स्वातन्त्र्येण निरंकुशा स्थितिरभीर्निद्रा श्मशाने वने ।
वस्त्रं क्षालनशोषणादिरहितं दिग्वास्तु शय्या मही
संचारो निगमान्तवीथिषु विदां क्रीडा परे ब्रह्मणि ॥ ५३९ ॥

*cintāśūnyamadainyabhaikṣamaśanaṁ pānaṁ saridvāriṣu*
*svātantryeṇa niraṅkuśā sthitirabhīrnidrā śmaśāne vane /*
*vastraṁ kṣālanaśoṣaṇādirahitaṁ digvāstu śayyā mahī*
*sañcāro nigamāntavīthiṣu vidāṁ krīḍā pare brahmaṇi // **539**//*

विमानमालम्ब्य शरीरमेतदखे भुनक्त्यशेषान्विषयानुपस्थितान् ।
परेच्छया बालवदात्मवेत्ता योऽव्यक्तलिङ्गोऽननुषक्तबाह्यः ॥ ५४० ॥

*vimānamālambya śarīrametad bhunaktyaśeṣānviṣayānupasthitān /*
*parecchayā bālavadātmavettā*
*yo'vyaktaliṅgo'nanuṣaktabāhyaḥ // **540**//*

दिगम्बरो वापि च साम्बरो वा त्वगम्बरो वापि चिदम्बरस्थः ।
उन्मत्तवद्वापि च बालवद्वा पिशाचवद्वापि चरत्यवन्याम् ॥ ५४१ ॥

*digambaro vāpi ca sāmbaro vā*
*tvagambaro vāpi cidambarasthaḥ |*
*unmattavadvāpi ca bālavadvā*
*piśācavadvāpi caratyavanyām ||* ***541****||*

कामान्निष्कामरूपी संश्चरत्येकचारो मुनिः।
स्वात्मनैव सदा तुष्टः स्वयं सर्वात्मना स्थितः॥ **५४२**॥

*kāmānniṣkāmarūpī saṁścaratyekacāro muniḥ |*
*svātmanaiva sadā tuṣṭaḥ svayaṁ sarvātmanā sthitaḥ ||* ***542****||*

क्वचिन्मूढो विद्वान् क्वचिदपि महाराजविभवः
क्वचिद्भ्रान्तः सौम्यः क्वचिदजगराचारकलितः।
क्वचित्पात्रीभूतः क्वचिदवमतः क्वाप्यविदितः
चरत्येवं प्राज्ञः सततपरमानन्दसुखितः॥ **५४३**॥

*kvacinmūḍho vidvān kvacidapi mahārājavibhavaḥ*
*kvacidbhrāntaḥ saumyaḥ kvacidajagarācārakalitaḥ |*
*kvacitpātrībhūtaḥ kvacidavamataḥ kvāpyaviditaḥ*
*caratyevaṁ prājñaḥ satataparamānandasukhitaḥ ||* ***543****||*

निर्धनोऽपि सदा तुष्टोऽप्यसहायो महाबलः।
नित्यतृप्तोऽप्यभुञ्जानोऽप्यसमः समदर्शनः॥ **५४४**॥

*nirdhano'pi sadā tuṣṭo'pyasahāyo mahābalaḥ |*
*nityatṛpto'pyabhuñjāno'pyasamaḥ samadarśanaḥ ||* ***544****||*

अपि कुर्वन्नकुर्वाणश्चाभोक्ता फलभोग्यपि ।
शरीर्यप्यशरीर्येष परिच्छिन्नोऽपि सर्वगः ॥ **५४५** ॥

*api kurvannakurvāṇaścābhoktā phalabhogyapi |*
*śarīryapyaśarīryeṣa paricchinno'pi sarvagaḥ ||* ***545****||*

अशरीरं सदा सन्तमिमं ब्रह्मविदं क्वचित् ।
प्रियाप्रिये न स्पृशतस्तथैव च शुभाशुभे ॥ **५४६** ॥

*aśarīraṁ sadā santamimaṁ brahmavidaṁ kvacit |*
*priyāpriye na spṛśatastathaiva ca śubhāśubhe ||* ***546****||*

स्थूलादिसम्बन्धवतोऽभिमानिनः
सुखं च दुःखं च शुभाशुभे च ।
विध्वस्तबन्धस्य सदात्मनो मुनेः
कुतः शुभं वाऽप्यशुभं फलं वा ॥ **५४७** ॥

*sthūlādisambandhavato'bhimāninaḥ*
*sukhaṁ ca duḥkhaṁ ca śubhāśubhe ca |*
*vidhvastabandhasya sadātmano muneḥ*
*kutaḥ śubhaṁ vā'pyaśubhaṁ phalaṁ vā ||* ***547****||*

तमसा ग्रस्तवद्भानादग्रस्तोऽपि रविर्जनैः ।
ग्रस्त इत्युच्यते भ्रान्त्यां ह्यज्ञात्वा वस्तुलक्षणम् ॥ **५४८** ॥

*tamasā grastavadbhānādagrasto'pi ravirjanaiḥ |*
*grasta ityucyate bhrāntyāṁ hyajñātvā vastulakṣaṇam ||* ***548****||*

तद्वद्देहादिबन्धेभ्यो विमुक्तं ब्रह्मवित्तमम् ।
पश्यन्ति देहिवन्मूढाः शरीराभासदर्शनात् ॥ **५४९** ॥

*tadvaddehādibandhebhyo vimuktaṁ brahmavittamam /*
*paśyanti dehivanmūḍhāḥ śarīrābhāsadarśanāt // **549**//*

अहिर्निर्ल्वयनीवायं मुक्त्वा देहं तु तिष्ठति ।
इतस्ततश्चाल्यमानो यत्किञ्चित्प्राणवायुना ॥ **५५०** ॥

*ahirnirlvayanīṁ vāyaṁ muktvā dehaṁ tu tiṣṭhati /*
*itastataścālyamāno yatkiñcitprāṇavāyunā // **550**//*

स्रोतसा नीयते दारु यथा निम्नोन्नतस्थलम् ।
दैवेन नीयते देहो यथाकालोपभुक्तिषु ॥ **५५१** ॥

*srotasā nīyate dāru yathā nimnonnatasthalam /*
*daivena nīyate deho yathākālopabhuktiṣu // **551**//*

प्रारब्धकर्मपरिकल्पितवासनाभिः
संसारिवच्चरति भुक्तिषु मुक्तदेहः ।
सिद्धः स्वयं वसति साक्षिवदत्र तूष्णी
चक्रस्य मूलमिव कल्पविकल्पशून्यः ॥ ५५२ ॥

*prārabdhakarmaparikalpitavāsanābhiḥ*
*saṁsārivaccarati bhuktiṣu muktadehaḥ /*
*siddhaḥ svayaṁ vasati sākṣivadatra tūṣṇīṁ*
*cakrasya mūlamiva kalpavikalpaśūnyaḥ // **552**//*

नैवेन्द्रियाणि विषयेषु नियुंक्त एष
नैवापयुंक्त उपदर्शनलक्षणस्थः ।
नैव क्रियाफलमपीषदवेक्षते स
स्वानन्दसान्द्ररसपानसुमत्तचित्तः ॥ **५५३** ॥

*naivendriyāṇi viṣayeṣu niyuṅkta eṣa*
*naivāpayuṅkta upadarśanalakṣaṇasthaḥ /*
*naiva kriyāphalamapīṣadavekṣate sa*
*svānandasāndrarasapānasumattacittaḥ // **553**//*

लक्ष्यालक्ष्यगतिं त्यक्त्वा यस्तिष्ठेत्केवलात्मना ।
शिव एव स्वयं साक्षादयं ब्रह्मविदुत्तमः ॥ **५५४** ॥

*lakṣyālakṣyagatiṁ tyaktvā yastiṣṭhetkevalātmanā /*
*śiva eva svayaṁ sākṣādayaṁ brahmaviduttamaḥ // **554**//*

जीवन्नेव सदा मुक्तः कृतार्थो ब्रह्मवित्तमः ।
उपाधिनाशादब्रह्मैव सन् ब्रह्माप्येति निर्द्वयम् ॥ **५५५** ॥

*jīvanneva sadā muktaḥ kṛtārtho brahmavittamaḥ /*
*upādhināśādbrahmaiva san brahmāpyeti nirdvayam // **555**//*

शैलूषो वेषसद्भावाभावयोश्च यथा पुमान् ।
तथैव ब्रह्मविच्छ्रेष्ठः सदा ब्रह्मैव नापरः ॥ **५५६** ॥

*śailūṣo veṣasadbhāvābhāvayośca yathā pumān /*
*tathaiva brahmavicchreṣṭhaḥ sadā brahmaiva nāparaḥ // **556**//*

यत्र क्वापि विशीर्णं सत्पर्णमिव तरोर्वपुः पततात्।
ब्रह्मीभूतस्य यतेः प्रागेव तच्चिदग्निना दग्धम्॥ ५५७॥

*yatra kvāpi viśīrṇaṁ satparṇamiva tarorvapuḥ patatāt |*
*brahmībhūtasya yateḥ prāgeva taccidagninā dagdham || 557||*

सदात्मनि ब्रह्मणि तिष्ठतो मुनेः
पूर्णाऽद्वयानन्दमयात्मना सदा।
न देशकालाद्युचितप्रतीक्षा
त्वङ्खेमांसविट्खेपिण्डविसर्जनाय॥ ५५८॥

*sadātmani brahmaṇi tiṣṭhato muneḥ*
*pūrṇā'dvayānandamayātmanā sadā |*
*na deśakālādyucitapratīkṣā*
*tvaṅmāṁsaviṭpiṇḍavisarjanāya || 558||*

देहस्य मोक्षो नो मोक्षो न दण्डस्य कमण्डलोः।
अविद्याहृदयग्रन्थिमोक्षो मोक्षो यतस्ततः॥ ५५९॥

*dehasya mokṣo no mokṣo na daṇḍasya kamaṇḍaloḥ |*
*avidyāhṛdayagranthimokṣo mokṣo yatastataḥ || 559||*

कुल्यायामथ नद्यां वा शिवक्षेत्रेऽपि चत्वरे।
पर्णं पतति चेत्तेन तरोः किं नु शुभाशुभम्॥ ५६०॥

*kulyāyāmatha nadyāṁ vā śivakṣetre'pi catvare |*
*parṇaṁ patati cettena taroḥ kiṁ nu śubhāśubham || 560||*

पत्त्रस्य पुष्पस्य फलस्य नाशवद्दे-देहेन्द्रियप्राणधियां विनाशः।
नैवात्मनः स्वस्य सदात्मकस्या-नन्दाकृतेर्वृक्षवदस्ति चैषः॥ ५६१॥

*patrasya puṣpasya phalasya nāśavad-*
*dehendriyaprāṇadhiyāṁ vināśaḥ |*
*naivātmanaḥ svasya sadātmakasyā-*
*nandākṛtervṛkṣavadasti caiṣaḥ || **561**||*

प्रज्ञानघन इत्यात्मलक्षणं सत्यसूचकम्।
अनूद्यौपाधिकस्यैव कथयन्ति विनाशनम्॥ ५६२॥

*prajñānaghana ityātmalakṣaṇaṁ satyasūcakam |*
*anūdyaupādhikasyaiva kathayanti vināśanam || **562**||*

अविनाशी वा अरेऽयमात्मेति श्रुतिरात्मनः।
प्रब्रवीत्यविनाशित्वं विनश्यत्सु विकारिषु॥ ५६३॥

*avināśī vā are'yamātmeti śrutirātmanaḥ |*
*prabravītyavināśitvaṁ vinaśyatsu vikāriṣu || **563**||*

पाषाणवृक्षतृणधान्यकडङ्कराद्या दग्धा भवन्ति हि मृदेव यथा तथैव।
देहेन्द्रियासुमन आदि समस्तदृश्यं ज्ञानाग्निदग्धमुपयाति परात्मभावम्॥ ५६४॥

*pāṣāṇavṛkṣatṛṇadhānyakaḍaṅkarādyā*
*dagdhā bhavanti hi mṛdeva yathā tathaiva |*
*dehendriyāsumana ādi samastadṛśyaṁ*
*jñānāgnidagdhamupayāti parātmabhāvam || **564**||*

विलक्षणं यथा ध्वान्तं लीयते भानुतेजसि ।
तथैव सकलं दृश्यं ब्रह्मणि प्रविलीयते ॥ ५६५ ॥

*vilakṣaṇaṁ yathā dhvāntaṁ līyate bhānutejasi /*
*tathaiva sakalaṁ dṛśyaṁ brahmaṇi pravilīyate // **565**//*

घटे नष्टे यथा व्योम व्योमैव भवति स्फुटम् ।
तथैवोपाधिविलये ब्रह्मैव ब्रह्मवित्स्वयम् ॥ ५६६ ॥

*ghaṭe naṣṭe yathā vyoma vyomaiva bhavati sphuṭam /*
*tathaivopādhivilaye brahmaiva brahmavitsvayam // **566**//*

क्षीरं क्षीरे यथा क्षिप्तं तैलं तैले जलं जले ।
संयुक्तमेकतां याति तथाऽऽत्मन्यात्मविन्मुनिः ॥ ५६७ ॥

*kṣīraṁ kṣīre yathā kṣiptaṁ tailaṁ taile jalaṁ jale /*
*saṁyuktamekatāṁ yāti tathā''tmanyātmavinmuniḥ // **567**//*

एवं विदेहकैवल्यं सन्मात्रत्वमखण्डितम् ।
ब्रह्मभावं प्रपद्यैष यतिर्नावर्तते पुनः ॥ ५६८ ॥

*evaṁ videhakaivalyaṁ sanmātratvamakhaṇḍitam /*
*brahmabhāvaṁ prapadyaiṣa yatirnāvartate punaḥ // **568**//*

सदात्मैकत्वविज्ञानदग्धाविद्यादिवर्ष्मणः ।
अमुष्य ब्रह्मभूतत्वादखे ब्रह्मणः कुत उद्भवः ॥ ५६९ ॥

*sadātmaikatvavijñānadagdhāvidyādivarṣmaṇaḥ /*
*amuṣya brahmabhūtatvād brahmaṇaḥ kuta udbhavaḥ // **569**//*

मायाक्लृप्तौ बन्धमोक्षौ न स्तः स्वात्मनि वस्तुतः।
यथा रज्जौ निष्क्रियायां सर्पाभासविनिर्गमौ॥ ५७०॥

*māyāklṛptau bandhamokṣau na staḥ svātmani vastutaḥ |*
*yathā rajjau niṣkriyāyāṁ sarpābhāsavinirgamau || **570**||*

आवृतेः सदसत्त्वाभ्यां वक्तव्ये बन्धमोक्षणे।
नावृतिर्ब्रह्मणः काचिदन्याभावादनावृतम्।
यद्यस्त्यद्वैतहानिः स्यादखे द्वैतं नो सहते श्रुतिः॥ ५७१॥

*āvṛteḥ sadasattvābhyāṁ vaktavye bandhamokṣaṇe |*
*nāvṛtirbrahmaṇaḥ kācidanyābhāvādanāvṛtam |*
*yadyastyadvaitahāniḥ syād dvaitaṁ no sahate śrutiḥ || **571**||*

बन्धञ्च मोक्षञ्च मृषैव मूढा बुद्धेर्गुणं वस्तुनि कल्पयन्ति।
दृगावृतिं मेघकृतां यथा रवौ यतोऽद्वयाऽसङ्गचिदेतदक्षरम्॥ ५७२॥

*bandhañca mokṣañca mṛṣaiva mūḍhā*
*buddherguṇaṁ vastuni kalpayanti |*
*dṛgāvṛtiṁ meghakṛtāṁ yathā ravau*
*yato'dvayā'saṅgacidetadakṣaram || **572**||*

अस्तीति प्रत्ययो यश्च यश्च नास्तीति वस्तुनि।
बुद्धेरेव गुणावेतौ न तु नित्यस्य वस्तुनः॥ ५७३॥

*astīti pratyayo yaśca yaśca nāstīti vastuni |*
*buddhereva guṇāvetau na tu nityasya vastunaḥ || **573**||*

अतस्तौ मायया क्लृप्तौ बन्धमोक्षौ न चात्मनि ।
निष्कले निष्क्रिये शान्ते निरवद्ये निरञ्जने ।
अद्वितीये परे तत्त्वे व्योमवत्कल्पना कुतः ॥ ५७४ ॥

*atastau māyayā klṛptau bandhamokṣau na cātmani |*
*niṣkale niṣkriye śānte niravadye nirañjane |*
*advitīye pare tattve vyomavatkalpanā kutaḥ || **574**||*

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ ५७५ ॥

*na nirodho na cotpattirna baddho na ca sādhakaḥ |*
*na mumukṣurna vai mukta ityeṣā paramārthatā || **575**||*

सकलनिगमचूडास्वान्तसिद्धान्तरूपं परमिदमतिगुह्यं दर्शितं ते मयाद्य ।
अपगतकलिदोषं कामनिर्मुक्तबुद्धिं
स्वसुतवदसकृत्त्वां भाव्यित्वा मुमुक्षुम् ॥ ५७६ ॥

*sakalanigamacūḍāsvāntasiddhāntarūpaṁ*
*paramidamatiguhyaṁ darśitaṁ te mayādya |*
*apagatakalidoṣaṁ kāmanirmuktabuddhiṁ*
*svasutavadasakṛttvāṁ bhāvyitvā mumukṣum || **576**||*

इति श्रुत्वा गुरोर्वाक्यं प्रश्रयेण कृतानतिः ।
स तेन समनुज्ञातो ययौ निर्मुक्तबन्धनः ॥ ५७७ ॥

*iti śrutvā gurorvākyaṁ praśrayeṇa kṛtānatiḥ |*
*sa tena samanujñāto yayau nirmuktabandhanaḥ || **577**||*

गुरुरेव सदानन्दसिन्धौ निर्मग्नमानसः ।

पावयन्वसुधां सर्वां विचचार निरन्तरः ॥ **५७८** ॥

*gurureva sadānandasindhau nirmagnamānasaḥ |*
*pāvayanvasudhāṁ sarvāṁ vicacāra nirantaraḥ ||* ***578****||*

इत्याचार्यस्य शिष्यस्य संवादेनात्मलक्षणम् ।

निरूपितं मुमुक्षूणां सुखबोधोपपत्तये ॥ **५७९** ॥

*ityācāryasya śiṣyasya saṁvādenātmalakṣaṇam |*
*nirūpitaṁ mumukṣūṇāṁ sukhabodhopapattaye ||* ***579****||*

हितमिदमुपदेशमाद्रियन्तां विहितनिरस्तसमस्तचित्तदोषाः ।

भवसुखविरताः प्रशान्तचित्ताः श्रुतिरसिका यतयो मुमुक्षवो ये ॥ **५८०** ॥

*hitamidamupadeśamādriyantāṁ vihitanirastasamastacittadoṣāḥ |*
*bhavasukhaviratāḥ praśāntacittāḥ*
*śrutirasikā yatayo mumukṣavo ye ||* ***580****||*

संसाराध्वनि तापभानुकिरणप्रोद्भूतदाहव्यथा-

खिन्नानां जलकांक्षया मरुभुवि भ्रान्त्या परिभ्राम्यताम् ।

अत्यासन्नसुधाम्बुधिं सुखकरं ब्रह्माद्वयं दर्शय-

त्येषा शङ्करभारती विजयते निर्वाणसंदायिनी ॥ **५८१** ॥

*saṁsārādhvani tāpabhānukiraṇaprodbhūtadāhavyathā-*
*khinnānāṁ jalakāṅkṣayā marubhuvi bhrāntyā paribhrāmyatām |*
*atyāsannasudhāmbudhiṁ sukhakaraṁ brahmādvayaṁ darśaya-*
*tyeṣā śaṅkarabhāratī vijayate nirvāṇasandāyinī ||* ***581****||*

*Om Tat Sat*



**www.aghori.it**